



476







Sanskrit-Drucke
Eine Sammlung indischer Texte begründet von
Karl F. Geldner.
1.

Halâyudha's Kavirahasya

in beiden Recensionen

herausgegeben

von

Ludwig Heller.

Greifswald
Julius Abel
1900.


Halâyudha's Kavirahasya.



der darauf hinweist, dass ihm eine Quelle zur Verfügung gestanden hat, deren Provenienz unterhalb x auf der Linie nach Bü zu suchen ist. Dafür, dass r auch eine Quelle benutzt hat, deren Ursprung unterhalb x auf der Linie nach Bhª D liegen muss, spricht die Thatsache, dass er in Str. 7 die in Bhª D überlieferte unsinnige Lesart *dhîmân na dharma*° erklärt*).

Ganz nach r gearbeitet und für die Textkritik von äusserst geringer Bedeutung ist der Kommentar r1. Str. 105, wo r das richtige *vṛṣyaṁ* erklärt, bespricht r1 die falsche Lesart *gṛdhyaṁ* der y-Gruppe. Er wird somit auch seinerseits wieder eine Quelle benutzt haben, deren Ursprung unterhalb x auf der Linie nach Bhª D zu suchen ist**).

Ich stelle also mit allem Vorbehalt folgendes Stemma auf:



Bü ist die weitaus beste Handschrift des Textes.

Die Kommentare r und r1 sind anfangs recht ausführlich, werden dann aber immer spärlicher, um sich schliesslich auf die

*) Selbstverständlich besteht auch die Möglichkeit, dass r kontaminierte Manuskripte und Manuskripte mit Marginal-Varianten benutzt hat.

**) Das Manuskript von r¹ ist von derselben Hand wie D. Die kurzen Citate der Strophenanfänge sind aus D oder D's Vorlage abgeschrieben (s. Einl. S. 53).

Erklärung der Verbalformen zu beschränken. Um nun jeden Zweifel über das kritische Material, nach dem eine bestimmte Stelle bearbeitet ist, zu beseitigen, habe ich bis Str. 150, ungefähr dem Punkte, wo die Kommentare dürftiger werden, bei allen irgendwie wichtigen Lesarten den Umstand, dass von einem Kommentar oder von beiden die fragliche Stelle nicht erörtert wird, stets durch „r schweigt", „r1 schweigt" oder „r r1 schweigen" notiert. Ist also bis Str. 150 bei einer Variante von Belang nichts über die Kommentare vermerkt, so stimmen diese mit meinem Texte überein. Von Str. 151 an ist stillschweigend vorausgesetzt, dass die Kommentare nur die Verbalformen erklären. Es ist, wenn jede Bemerkung über die Kommentare fehlt, in dieser Partie bei allen Wörtern ausser den Verbalformen, die illustriert werden sollen, stets anzunehmen, dass die Kommentare die betreffende Stelle nicht erörtern. Geschieht dies doch, und giebt die Stelle zu kritischen Zweifeln Anlass, so ist auf die Erläuterungen der Kommentare besonders aufmerksam gemacht.

β) Kürzere Recension:

C A Bhβ G und der Kommentar v bilden eine eng geschlossene Gruppe. Andererseits weisen B und L T F durch Übereinstimmung in Fehlern auf eine gemeinsame Stammhandschrift. B ist zwar durch Schreibfehler arg entstellt, repräsentiert aber die beste Überlieferung. L T F*) sind fast als ein einheitlicher Text zu betrachten. In ganz vereinzelten Fällen scheint eine Kontamination zwischen den Gruppen C A Bhβ G und L T F stattgefunden zu haben; die in dieser Beziehung wichtigste Stelle ist Str. 163. Das neu hinzugekommene Manuskript P (Paris, Bibl. nat. Sanscr. bengal. 82 A, 12 fol., 6—7 lin.**) ist kritisch fast ganz wertlos, weil es aus

*) F ist im Interesse der Klarheit im kritischen Apparat nicht nur dann citiert, wenn es anders liest als T (s. Einl. S. 54), sondern stets, wenn es von meinem Texte abweicht.

**) Eine Kollation dieser Handschrift verdanke ich der Liebenswürdigkeit des Herrn Louis Finot in Paris.

verschiedenen Quellen kontaminiert ist. In vereinzelten Fällen scheint P, gegen die übrigen Handschriften mit *a* übereinstimmend, die korrekte Lesart zu bieten.

Von den Kommentaren ist v kritisch wertlos, weil er nur das bietet, was schon aus C A Bh*β* G bekannt ist. t leistet für die Herstellung des Textes gute Dienste, während vl, ursprünglich wohl dasselbe Werkchen wie t, vielfach nach L umgeändert ist.

Diese Kommentare der kürzeren Recension erklären nur die Verbalformen.

Ich habe mich hier auf die notwendigsten Angaben über die Verwertung des kritischen Materials für die Rekonstruktion des Textes der beiden Recensionen beschränkt. Weitere das Kavirahasya betreffende Fragen sollen bei der demnächst erfolgenden Veröffentlichung der Anmerkungen, Kommentarauszüge und Übersetzungen erörtert werden.

Herr Professor Geldner hat mir durch opferwilliges Entgegenkommen die Veröffentlichuug dieser Texte ermöglicht.

Zu grösstem Danke bin ich ausserdem mehreren Greifswalder Professoren verpflichtet, die durch Überweisung einer zu wissenschaftlichen Zwecken bestimmten Summe den Druck dieser Arbeit unterstützt haben.

Greifswald.

L. Heller.

α) Text der längeren Recension.

जयन्ति मुरजित्पादनखदीधितिदीपिकाः ।
मोहान्धकारविध्वंसान्मुक्तिमार्गप्रकाशिकाः ॥ १ ॥

प्राणायामश्रमोद्भूतस्वेदार्द्रः पातु वः शिवः ।
गङ्गोपगूहनभ्रान्त्या पार्वत्या वीक्षितः क्षणम् ॥ २ ॥

लोकेषु शास्त्रेषु च ये प्रसिद्धाः काव्येषु ये सत्कविभिः प्रयुक्ताः ।
उच्चित्य तांश्चित्तविनोदनाय शब्दानहं धातुभिरुद्धरामि ॥ ३ ॥

एकार्था एकशब्दाश्च भिन्नार्था एकवाचकाः ।
तुल्यार्थास्तुल्यशब्दाश्च नानार्थाः सदृशाक्षराः ॥ ४ ॥

एकार्थाः समशब्दाश्च निबध्यन्तेऽच धातवः ।
धातुपारायणाम्भोधिपारोत्तीर्णधिया मया ॥ ५ ॥

अस्त्यगस्त्यमुनिज्योत्स्नापविचे दक्षिणापथे ।
कृष्णराज इति ख्यातो राजा साम्राज्यदीक्षितः ॥ ६ ॥

D Bh$^{\alpha}$ beg. श्रीगणेशाय नमः ॥ r[1] beg. ओम् श्रीगणेशाय नमः ॥ गोपायतीति, s. Strophe 7 ॥ r Jainadiagramm. ओं । अर्हं नमः ॥ Näheres s. Einl. S. 49 ffg. ॥ Bh$^{\alpha}$ अथ कविगुह्यनामकाव्यप्रारंभः ॥ — १) = β 1. D °दीपिकाः st. °काशिकाः ॥ — ३) Indravajrâ. = β 2. D तान्विच्चविनोद°, Bh$^{\alpha}$ ताम्श्चिन्नविनोद°, über °खिन्न °ist °चित्त° geschr., r r[1] schweigen ॥ — ४) cfr. β 3. — ५) cfr. β 4. — ६) = β 5.

गोपायति क्षितिमिमां चतुरब्धिसीमां
धीमानधर्मवचनाच्च जुगुप्सते यः ।
वित्तं न गोपयति यस्तु वनीपकेभ्यो
धीरो न गुप्यति महत्यपि कार्यजाते ॥ ७ ॥

अग्निं पृणाति पृणति द्विजदेवताश्च
प्रीणाति सज्जनमनांसि पृणोति धर्मे ।
यः प्रीयते प्रणयिषु प्रयते च बन्धू-
न्यं प्रीणयन्ति कविसूक्तरसायनानि ॥ ८ ॥

धर्मे व्याप्रियते पिपर्ति पृथिवीं यः पारयत्याश्रमं
शश्वत्पारयति व्रतानि विधिवद्ब्रह्मैकताने स्थितः ।
सर्वस्यापि च पूरयत्यभिमतं यः किंचिदापूयते
पूर्यन्ते च मनोरथाः सुकृतिनो यस्यार्थिसंदर्शनात् ॥ ९ ॥

यस्यांहः क्षयति क्षियन्ति रिपवः क्षीणाति विघ्नोदयो
ब्रह्माभ्यासरसायनव्यसनिनः कायश्च न क्षायति ।
क्षीयन्ते न वसूनि याचकजनैः स्वेच्छागृहीतान्यपि
क्षोणीशः क्षिणुते समस्तमपि यः क्षिप्रं प्रजोपद्रवम् ॥ १० ।

यो धर्मं श्रुतिनिर्मलेन मनसा मीमांसते सर्वदा
यो मान्यान्बहु मानयत्यविरतं भृत्यांश्च संमानति ।

---

७) Vasantatilakâ. cfr. β 6. r setzt voraus धीमान्न धर्म°, D धोमान्न-धर्म्म°, zwischen न्न und ध ist ऽ übergeschr., am Rande न, Bhα धिमाच धर्म°, r¹ schweigt । Bü D वीरो st. धीरो, r¹ schweigt ॥ — ८) Vasantatilakâ. cfr. β 7. D °सूक्ति°, r¹ schweigt ॥ — ९) Çârdûlavikrîḍita. cfr. β 37 und β 151. D °पूरयेत्, Bhα °पूर्यते st. °पूयते । D यस्यार्थसं° ॥ — १०) Çârdûlavikrîḍita. cfr. β 110 und β 112. Bü D Bhα चयंति st. चियन्ति, r r¹ erkl. चियन्ति । D Bhα चणुते, r¹ चणुया हिंसायां तनादौ ॥

शचौ मानयते मनांसि मनुते यश्चेष्टया देहिनां
युद्धे वैरिबलं तृणाय सकलं यो मन्यते तेजसा ॥ ११ ॥

धूनोति चम्पकवनानि धुनोत्यशोकं
चूतं धुनाति धुवति स्फुटितातिमुक्तम् ।
वायुर्विधूनयति केसरपुष्परेणू-
न्यत्कानने धवति चन्दनमञ्जरीश्च ॥ १२ ॥

तृष्णां न पुष्णाति यशांसि पुष्यति
प्रवारणैर्विप्रमनांसि पोषति ।
भृत्यांस्तु यः पोषयतीप्सितैर्धनैः
प्रतिक्षणं पूषति यस्य विक्रमः ॥ १३ ॥

कायो न जीर्यति जृणाति न यस्य शक्ति-
र्नो जूर्यते भुजबलं न जिनाति तेजः ।
यद्विद्विषां जरति चेतसि भोगतृष्णा
तेषां वपूंषि विपिनेषु च जारयन्ति ॥ १४ ॥

गाथां ग्राथयति ग्रथत्यविरतं श्लोकांश्च लोकोत्तरा-
न्गद्यं ग्रन्थयति स्फुटार्थललितं यो नाटकं ग्रन्थति ।
ग्रथ्नाति श्रुतिशास्त्रयोर्विवरणं ग्रन्थाननेकांश्च यः
स्वच्छं यस्य मनः स्वभावसरलं न ग्रन्थते कुत्रचित् ॥ १५ ॥

---

११) Çârdûlavikrîḍita. cfr. β 32 und β156. D stellt die Strophe hinter die folgende. D देवं st. शचौ ॥ — १२) Vasantatilakâ. = β 8. D चंपक° st. चन्दन° ॥ — १३) Upajâti (Indravaṃçâ + Vaṃçastha, s. Anm.) = β 21; nur hat β च statt तु । Bh$^{\alpha}$ प्रचारणै° ॥ — १४) Vasantatilakâ. = β 9. — १५) Çârdûlavikrîḍita. cfr. β 12. D Bh$^{\alpha}$ श्लोकांश्च श्लोकोत्तरान्, Bü श्लोका-म्प्रश्लोकात्तरान्, r श्लोकोत्तरान्, r[1] schweigt । D ग्रंथं, Bh$^{\alpha}$ ग्रंथा st. गद्यं ॥

यस्तृप्यति प्रवरकाव्यरसामृतेन
तृप्नोति शास्त्रपरिभावनया च भूयः ।
ज्ञानेन तर्पयति यः परमात्मवेदी
तर्पेत्यनन्यसुलभैश्च सुखोपभोगैः ॥ १६ ॥

मृषयति न मृषालापं मृषति न पिशुनं न मृष्यति क्षुद्रम्
मर्षयति न दुर्वृत्तं मर्षति न शठं न मर्षते कपटम् ॥ १७

यो व्रीणाति जयश्रियं रणमुखे धर्मं वृणीते ऽध्वरे
सत्कीर्तिं च वृणाति यश्च वरयत्यानन्दमध्यात्मजम् ।
तेजोभिर्जगदावृणोति वरति ज्ञातीन्यशो व्रीयते
युद्धे वारयति द्विषो निवरते नित्यं प्रजोपद्रवम् ॥ १८ ॥

यस्याननान्न खलु निष्कलतीत्यसूक्तं
धीरस्य यस्य हृदयं कलते न कश्चित् ।
यः कालयत्यरिषु काल इवोग्रदण्डं
लीलां च यः कलयति त्रिदशाधिपस्य ॥ १९ ॥

श्राति श्राद्धे हविरभिमतं श्रोत्रियाणां गृहेषु
श्रायन्त्यन्ये तु परमरसान्क्षीरखण्डप्रकारान् ।
राष्ट्रे यस्य द्विजवरजनः प्रीतिहेतोः पितॄणां
संश्रीणाति श्रुतिनिगदितं स्वादु हव्यं च कव्यम् ॥ २० ॥

---

१६) Vasantatilakâ. cfr. β 10. Bh$^{\alpha}$ प्रचुरकाव्य°, r[1] schweigt । Bü यत् st. यः ॥ — १७) Ârya (Gîti). cfr. β 15. D दुर्वृत्तं मृषति शठं नैव मर्षते ॥ — १८) Çârdûlavikrîḍita. cfr. β 11. Bh$^{\alpha}$ नयश्रियं । Bh$^{\alpha}$ धर्मे । Bü यस्य st. यश्च । D °वृणाति st. °वृणोति । Bü r[1] वारयते, s. Anm. ॥ — १९) Vasantatilakâ. cfr. β 70. D °सूक्तिर् st. °सूक्तं, r[1] schweigt । D Bh$^{\alpha}$ वीरस्य st. धीरस्य, r r[1] schw. । Bh$^{\alpha}$ यस्य कलते हृदयं न, r r[1] nicht zu entscheiden ॥ — २०) Mandâ-

ईर्ते यत्कीर्तिरैन्द्रं पदमुपरि ततः सप्तलोकीमियर्ति
प्रेम्णा यं प्रेरति श्रीरतिशयविषयप्रीतिसंप्राप्तये च ।
यं धर्मे प्रेरयन्ति प्रमुदितमनसो यज्ञभागेन देवाः
प्रेलत्यर्थैरनर्थान्त्रणशिरसि शरैः प्रेलयत्यप्रियान्यः ॥ २१ ॥

यस्योद्यानवने स्फुटन्ति सततं वल्लीषु पुष्पच्छटाः
स्फोटन्ते नवकुड्मलानि कुटजप्रायेषु वृक्षेषु च ।
स्फोटन्ति द्विषतां शिरांसि सहसा यस्याप्रियं कुर्वतां
यश्चास्फोटयति स्फुटं दश दिशः कुर्वन्रवैः पूरिताः ॥ २२ ॥

यः शोभते सदसि शक्र इवोज्ज्वलश्रीः
स्त्रीणां पुरः शुभति काम इवाभिरामः ।
यः शुम्भति त्रिपुरशत्रुरिवात्तधन्वा
शत्रूंन्निशुम्भति कृतान्त इवाहवस्थः ॥ २३ ॥

धर्म्यां धुरं धरति धीरधियां प्रधानो
धाम्ना च धारयति यो धरणिं धनुष्मान् ।
आधीयते न खलु कस्यचिदात्मशक्ति-
र्यस्मिन्यशश्च धियति ध्रियते च कीर्तिः ॥ २४ ॥

---

krântâ. cfr. β 19. D Bh$^{\alpha}$ त्वभिमतरसान्, r r^{1} schweigen । Bü चीरषंड°, r r^{1} schweigen । Bü °जना । D संग्राणाति, r^{1} आंग् म् पाके क्यादी । Bh$^{\alpha}$ श्रुतनि°, r^{1} schweigt । D चाटु st. स्वादु, r r^{1} schweigen ॥

२१) Sragdharâ. cfr. β 18 und β 45. D Bh$^{\alpha}$ °प्राप्ति° st. °प्रीति° । D Bh$^{\alpha}$ °भागे च देवाः । D प्रेरत्यर्थै° ॥ — २२) Çârdûlavikrîḍita. = β 13. D पुष्पछ्दाः, r^{1} schweigt । D स्फोटंते द्वि° । r द्विषतां शत्रूणां किंकुर्व्वतां चाहितं विदधतां, Var. zu β 13 ist यस्याहितं, r^{1} schweigt । Bü Bh$^{\alpha}$ D यस्या-स्फोटयति, aber r यः । Bh$^{\alpha}$ D यशः° st. रवैः, r r^{1} schweigen ॥ — २३) Vasantatilakâ. cfr. β 41. Bü शत्रुं st. शत्रून्, Bh$^{\alpha}$ शत्रुन्, r^{1} schweigt ॥ — २४) Vasantatilakâ. cfr. β 35. Bh$^{\alpha}$ धाम्नावधार° । D शक्तिवि° st. कस्यचि° ॥

एको ऽपि यः समिति शेषति शत्रुसैन्यं
रूपेण यश्च विशिनष्टि रतेरभीकम् ।
त्यागेन शेषयति केवलराजचिह्नं
शेषं न शेषति धनं किमपि क्षितीशः ॥ २५ ॥

वस्ते चीनवरं निवासयति यश्चित्रं च पत्त्रोर्णकं
चित्तं सर्वजनस्य वासयति यस्तैस्तैर्गुणैरुज्ज्वलैः ।
यो देवानुपवासयत्यविरतं निर्वासयत्याहवे
द्रोहान्यस्य मुखाम्बुजे निवसति प्रत्यक्षवाग्देवता ॥ २६ ॥

यज्ञैरिच्छति जेतुमिन्द्रपदवीं यः कीर्तिमन्वेषते
दण्डो यस्य च दिङ्मुखेषु जयिनः सर्वेष्वपि प्रेषते ।
इष्णाति प्रयतः प्रसन्नहृदयो यो धर्मकार्ये सदा
यश्चान्विष्यति जामदग्न्यचरितं तैस्तैः कथाविस्तरैः ॥ २७

नाराचान्निशिनोति कश्चिदपरश्चक्रं निशीशांसते
कश्चिन्निश्यति तोमरान्निशणाति प्रासांस्तथैवेतरः ।
कश्चित्खड्गवरं निशानयति च प्राप्तप्रकामोदयः
प्रत्यासन्नरणोत्सवप्रमुदितो यत्सैन्यमध्ये जनः ॥ २८ ॥

---

२५) Vasantatilakâ. cfr. β 91 und β 194. Bü रतेषु भीकं, r erklärt s wohl रतेषु भीकम् als auch रतेरभीकम्, r[1] nur das Letzte ॥ — २६) Çârd lavikrîḍita. cfr. β 14. Bü. D r[1] im Strophencitat चीर° st. चीन°, r[1] in Erkl. schweigt । D Bh[α] चित्तं st. चित्रं । Bh[α] पत्त्रोर्णकं । D Bh[α] चेतः s चित्तं, r schweigt, r[1] nur सर्वस्यापि चेतो रंजयतीत्यर्थः । D Bh[α] यः प्रत्य वाग्देवता देवान्वासयति प्रवासयति यः क्रुद्धः कुलं विद्विषां [cfr. β] लक्ष्मी र्यस्य मुखांबुजे निवसति प्रीत्या सरस्वत्यपि [cfr. β] st. यस्तै° — °वाग्देवत r erklärt die Lesungen von Bü, r[1] nicht zu entscheiden, s. Anm. — २७) Çârdû lavikrîḍita. cfr. β 36. Bh[α] प्रयत, r[1] schweigt ॥ — २८) Çârdûlavikrîḍita. cf

रणाङ्गणे यः प्रमिणोति बाणान्मीनाति तैर्मत्तमतङ्गजेन्द्रान् ।
प्रमीयते ऽन्यानपि वीरमुख्यान्धर्मेण नित्यं मयते धनं च ॥ २९ ॥

आज्ञापयत्यवनिपाननुपदानहेतो-
र्युद्धे च संज्ञपयति प्रतिपक्षभूतान् ।
विप्रानुपज्ञपयति प्रचुरैः स्ववित्तै-
र्यः प्रज्ञया ज्ञपयति त्रिजगत्करस्थम् ॥ ३० ॥

उद्घट्टते न परमर्म स धर्मशीलः
संघट्टयत्यरिषु दुर्दमदोःसहायः ।
तेषां विघाटयति हस्तिघटासहस्र-
मित्थं च तस्य घटते नरवीरशब्दः ॥ ३१ ॥

ब्रह्मध्यानात्त्रुडति सहसा यस्य संसारबन्ध-
स्त्रुट्यत्यन्तःकलुषमखिलं भावनामार्जनेन ।
यं यं पश्यत्यमलहृदयस्तस्य तस्यात्मवेदी
तोडत्यंहः सकलमचिरात्तोडयत्यश्रियं च ॥ ३२ ॥

कुरति गुणवत्क्रौञ्चद्वन्द्वं गुजन्ति च सारसाः
श्रवणसुभगं हंसानीकं कुनाति मनोरमम् ।

β 76. D निघ्रियाति, Bü निसणाति [स scheint aus घ्र geändert zu sein] st. निघ्रणाति, r निसणाति । घण घ्रण संभुक्तौ । भ्वादौ । परस्मै ।, r[1] in d. Str. निघ्रणाति, erkl. घ्राण श्राण दाने । Bü in प्रासां° wohl स aus घ्र verbessert । r[1] in d. Str. निघ्राणयति, erkl. घ्राणान् ॥

२९) Upajâti (Viparîtâkhyânakî). cfr. β 39. D Bh[α] r[1] in d. Str. महागजेन्द्रान्, r[1] in d. Erkl. schweigt ॥ — ३०) Vasantatilakâ. cfr. β 69. Bh[α] °पक्षभूपान् । D Bh[α] r[1] in d. Str. हिरण्यै° st. स्ववित्तै°, r[1] in d. Erkl. schweigt ॥ — ३१) Vasantatilakâ. cfr. β 165 und β 202. — ३२) Mandâkrântâ. D त्रुड्डत्यंतः, Bh[α] तुंडुत्यंतः ॥

यदुपनगरस्रोतस्विन्यां रतोन्मदकामिनी-
मणितमधुरं क्रूयन्ते च क्वचिज्जलरङ्कवः ॥ ३३ ॥
स्वर्गं भावयते भुजार्जितधनः काम्यैरसौ कर्मभि-
र्वेदोक्तैर्दुरितक्षयं च भवते नित्यैः स नित्योदितः ।
कृत्स्नं भावयति प्रसन्नहृदयो ब्रह्मैकतत्त्वं जग-
द्यस्याविर्भवति स्वयं गुणगणः सर्वोऽपि योगोद्भवः ॥ ३४ ॥
सत्येन यः शुन्धति वाचमात्मनः
कायं च यः शुन्धयति व्रतादिभिः ।
यः शुन्धते दोषनिवर्तनात्मनो
यस्य त्रयं शुध्यति कारणैस्त्रिभिः ॥ ३५ ॥
तापयत्यशिशिरद्युतिर्दिवा पावकस्तपति वासरक्षये ।
यः सदा वितपते निजौजसा तप्यते च मुनिवत्परं तपः ॥ ३६ ॥
अतिरेचयति श्रिया सुरेन्द्रा-
दतिरिङ्क्ते च न तेजसा खरांशोः ।

---

३३) Hariṇî. cfr. β 17. D Bh$^{\alpha}$ r[1] in der Strophe क्नाति [Bh$^{\alpha}$ sehr oft क्नु st. कु], r[1] erkl. क्रूग् श शब्दे क्र्यादौ । अत्र कविना परमतेन ह्रस्वः क्रियते. s. Anm. | Bü D Bh$^{\alpha}$ r °श्रोतस्विन्यां, r[1] in d. Str. स्रो°, schweigt in d. Erkl. | Bh$^{\alpha}$ r[1] in d. Str. रते मद°, r[1] in d. Erkl. und r schweigen, D रतैमद° | D कूयंते, Bh$^{\alpha}$ r[1] in d. Str. क्रूयंते, r[1] erkl. क्रूयेङ् । r[1] यः कणति क्वणतीति पाठः सो ऽशुद्ध इव लक्ष्यते दात्यूहः कणति क्वणतीत्यादिवृत्तवक्ष्यमाणे [Ms. °द्दि । वृ°] पुनरुक्तादर्शनात्, s. Anm. und α 43. ॥ — ३४) Çârdûlavikrîḍita. cfr. β 50. Bü r lassen d. Str. aus. D स्वर्गे । Bh$^{\alpha}$ विश्वैक° st. ब्रह्मैक° । D r[1] in d. Strophe सुधीरु st. जगद्, r[1] schweigt in d. Erkl. ॥ — ३५) Indravaṃçâ. cfr. β 30. Bh$^{\alpha}$ शुद्धति, शुधयति, शुधते, r[1] im Strophencitat richtig यः शुंधतीति, in d. Erkl. zu dieser Form शुध शुद्धौ भ्वादौ । r[1] शुंधच् . . . दिवादौ । Bü D Bh$^{\alpha}$ °वर्त्तनात्मनो ॥ — ३६) Rathoddhatâ. cfr. β 29.

व्यतिरेचति नात्मबन्धुवर्गा-
द्ददतो ऽप्यस्य रिणक्ति नार्थसंपत् ॥ ३७ ॥
सर्वो ऽपि धर्ममनुशीलति तस्य राष्ट्रे
कामांस्तु शीलयति धर्मधनाविरुद्धान् ।
स्वस्थो जनः शिलति को ऽपि न वस्तु किंचि-
द्भिक्षां यतिः सिलति यस्य तु शैववृत्तिः ॥ ३८ ॥
यो वृंहति द्विरदसैन्यमृतूपचारै-
र्भोगैश्च वृंहयति वारणशास्त्रवेदी ।
यद्बृंहति प्रतिगजानिव तर्जदुच्चै-
स्तद्वीक्ष्य यश्च वृहति द्विषतां क्षयाय ॥ ३९ ॥
न केचिद्बाधन्ते व्यपगतरुजः सर्वमनुजा
न बाधन्ते ऽन्योन्यं प्रकटितसुहृद्वृत्तिमधुराः ।
अनङ्गः सर्वेषा परमिह शरैर्विध्यति मनः
प्रजायां यस्यान्यो विधति न विरुद्धं कथमपि ॥ ४० ॥

---

३७) Aupacchandasika (Vasantamâlikâ). cfr. β 98. D °रिणक्ते st. °रिङ्क्ते । D Bh^α यस्य st. च न । D विरिणिक्ते ददतोपि st. दद° — °णक्ति, Bh^α °वर्गाद्रि-णक्ति ददति, lässt den Rest fort ॥ — ३८) Vasantatilakâ. cfr. β 247. D यस्य st. तस्य, Bh^α om., r r[1] schweigen । D स्वच्छो? st. स्वस्थो, r[1] erkl. स्वच्छत्वात्, r शुद्धत्वात्, s. Anm.। D om. को ऽपि — सिलति। Bh^α भिषा। r शिलति। शिल षिल ... उंछे ... शिलति। स एव शिल षिल ...। धात्वादेः षः [Ms. ष] सः। इत्यनेन सकारं निरूपयति, r[1] सिल शिल उंछे ...। एष एवं द्वितीय एव सिल, Bü शिलति st. सिलति ॥ — ३९) Vasantatilakâ. cfr. β 95. Bh^α यो st. यद् । D °निव गर्जदु°, r[1] schweigt । D यद् st. तद्, r r[1] unentschieden । Bh^α बृहति st. वृहति ॥ — ४०) Çikhariṇî. r वाधंते । वाधृ ... st. बाधन्ते । D °वृत्तम° । r[1] सर्वसामिति पाठः । D Bh^α प्रजानां, r[1] schweigt । D वधति न विरुद्धः ॥

धर्मेण साधु परिवर्हति यः पृथिव्यां
नित्यं निवर्हयति चार्थिजनस्य दौःस्थ्यम् ।
शौर्येण शत्रुबलमाशु निवर्हते यः
शत्रून्प्रवल्हत उदात्तमतिः सदैव ॥ ४१ ॥

गजति गजसमूहस्तस्य वेलावनान्ते
सरुष इव समुद्राः प्रेक्ष्य तं गाजयन्ति ।
तदुभयमनुकर्तुं गर्जतीवाम्बुवाहः
प्रतिरवभरितत्वाद्गर्जयन्त्यद्रयो ऽपि ॥ ४२ ॥

दात्यूहः कणति क्वणत्यविरतं श्वेतच्छदानां गण-
स्तीरोपान्ततरुस्थिता च कुररश्रेणी कुणत्युत्सुका ।
यस्यान्तःपुरदीर्घिकासु हृदयं यूनां समुत्कण्ठय-
न्कर्णाटीसुरतस्वरानुकरणैः कोयष्टिकः कूजति ॥ ४३ ॥

तेतिल्यते शिशुजनो धनिनां गृहेषु
तिल्लन्ति यौवनमदेन च तद्युवानः ।
चिल्लन्ति चारुनयनाः सततं तरुण्य-
श्चुल्लन्ति वृद्धवयसो ऽपि तदीयराष्ट्रे ॥ ४४ ॥

---

४१) Vasantatilakâ. cfr. β 254. r überall व, Bh^{α} überall ब, D in der ersten, Bü in der letzten Form व, sonst ब, r^1 im Strophencitat परिबर्हतीति, erkl. वृह, die übrigen Wurzeln mit ब । r परिवर्हति, erkl. तृहि वृहि वृद्धौ भ्वादौ । D Bh^{α} नित्यं च बर्हयति साधुजनस्य, r^1 unentschieden । Bh^{α} शत्रुन्प्रबर्हति, r^1 बर्हि, erkl. Parasm., s. Anm., D प्रबल्हति, r will neben वल्ह् auch वल्ह् zulassen, s. Anm. । Bh^{α} न दांत°, D न दान° st. उदात्त°, r r^1 schweigen ॥ — ४२) Mâlinî. cfr. β 222. D यं st. तं, r unentschieden, r^1 तं गजसमूहं । Bü D r °रवपरिपूर्णा, Bh^{α} °प्रतिपूर्णा, r^1 schw., aber r scheint ausser °परिपूर्णा noch die Lesart °भरितत्वाद् zu erwähnen. Näheres s. Anm. ॥ — ४३) Çârdûlavikrîḍita. cfr. β 17. — ४४) Vasantatilakâ. cfr. β 47.

यस्य पृथ्वी प्रसूते ऽर्थं धर्मो ऽर्थाच्च प्रसूयते ।
प्रसौति विजयं धर्मः स च प्रसवति श्रियम् ॥ ४५ ॥
शास्त्यरीन्धर्ममाशास्ते कीर्तिमाशंसते पराम् ।
यः शंसति सतां मार्गे विशसत्युत्पथस्थितान् ॥ ४६ ॥
घिणते न परद्रव्यं गृह्णाति विदुषां मनः ।
गृहते हृदयं स्त्रीणां द्विषां गृहयते शिरः ॥ ४७ ॥
ददाति द्रविणं भूरि दाति दारिद्र्यमर्थिनाम् ।
यो ऽवदायति कीर्तिं च शिरो ऽवद्यति विद्विषाम् ॥ ४८ ॥
वेत्ति सर्वाणि शास्त्राणि गर्वो यस्य न विद्यते ।
विन्ते धर्मं सदा सद्भिस्तेषु पूजां च विन्दति ॥ ४९ ॥
रात्रावुदयते चन्द्रो दिवोदयति भास्करः ।
उदेति यः सदैवोर्व्यां नोदीयन्ते च विद्विषः ॥ ५० ॥
नित्यं महति माहेयीं महयत्यर्थिनो द्विजान् ।
स्वर्गे महीयते यस्य कीर्तिर्लक्ष्मीश्च मंहते ॥ ५१ ॥
वृणक्ति वृजिनैः सङ्गं वृक्ते च वृषलैः सह ।
वर्जेत्यनार्जवोपेतैर्यो वर्जयति दुर्जनैः ॥ ५२ ॥

---

४५) cfr. β 26. — ४६) cfr. β 22. D Bh$^{\alpha}$ °शंसतेतरां, r r[1] erkl. आशंसते, schweigen über पराम्, s. Anm. ॥ — ४७) cfr. β 33. D पणते st. घिणते, r[1] im Strophencitat पिंणते, erkl. घिणते । Bh$^{\alpha}$ गर्हते, D गर्धते st. गृहते, r[1] गर्ह गल्ह कुत्सने भ्वादौ [i. e. गर्हते] । Bü द्विषतां गृह्यते, r गृहयते geändert in गृह्यते, r u. r[1] erklären aber गृहयते ॥ — ४८) = β 24. D दारिद्र्यम° ॥ — ४९) = β 25. Bü शास्त्राणि सर्वाणि, r[1] schweigt in d. Erkl., im Strophencitat वेत्ति सर्वाणि इति ॥ — ५०) cfr. β 23. D °वोर्यो, Bh$^{\alpha}$ °वोर्यं st. °वोर्व्यां, r r[1] schw. ॥ — ५१) cfr. β 34. — ५२) = β 27. r[1] s. folg. Str. । D वृंक्ते, Bü वृक्ते verbessert aus वृंक्ते ॥

न संपृणक्ति कृपणैः संपृङ्क्ते न पृथग्जनैः ।
संपर्चेति सदाचारैः संपर्चयति पण्डितैः ॥ ५३ ॥
नियुङ्क्ते गुल्मपालान्यो नियोजति नियोगिनः ।
नियोजयत्यनीकस्थान्स्वयं चात्मनि युज्यते ॥ ५४ ॥
बाणावलिं किरत्याजौ करोति शरमण्डपम् ।
कृणोति करिणः शत्रोर्यः कृणाति हयान्नरान् ॥ ५५ ॥
तयते यस्त्रयीधर्मं तायते च तपोधनान् ।
त्रायते भुवनं कृत्स्नं यत्कीर्तिः स्त्यायति क्षितौ ॥ ५६ ॥
सर्वस्वे ऽपि हृते वनीपकजनैः क्षुभ्नाति न त्यागिनः
संग्रामे परिवारितस्य रिपुभिः शूरस्य न क्षोभते ।
यस्यान्तःकरणं स्मरालसलसत्पौराङ्गनालोचनै-
स्तृष्यद्भिः परिपीयमानवपुषो धीरस्य न क्षुभ्यति ॥ ५७ ॥
यो लक्षते क्षितिभृतां चरितानि चारै-
र्लिङ्गैश्च लक्षयति यो हृदयं परेषाम् ।
सूक्ष्मातिसूक्ष्ममपि लक्षयते महात्मा
यो मन्त्रमप्रतिहतप्रतिभाप्रभावात् ॥ ५८ ॥

---

५३) cfr. β 28. r[1] nur न संपृणक्तीति, dann erst folgt d. Erkl. der vorigen Str. ॥ — ५४) cfr. β 42. — ५५) cfr. β 44. D कृणाति करिणः । Bh[α] शत्रुर्यः । alle Hdschr. bieten हयांतरान्, r हयांतरान्हयविशेषान्. r[1] nur हयविशेषान् ॥ — ५६) cfr. β 40. D स्त्यायते क्षितौ ॥ — ५७) Çârdûlavikrîḍita. cfr. β 56. Bh[α] कृते st. हृते । Ob °वारितस्य oder °चारितस्य, in Bü r nicht zu entscheiden, r[1] schweigt. । Bü त्रिष्यद्भिः, D Bh[α] तृप्यद्भिः st. konjic. तृष्यद्भिः, r r[1] schw. । Bü वीरस्य st. धीरस्य. r r[1] schw. ॥ — ५८) Vasantatilakâ. D यो लक्षति, r[1] यो लक्षतीति als Strophencitat, seine Erkl. scheint mir für लक्षते zu sprechen, s. Anm. । r सूक्ष्मातिसू° । D परात्मा st. महात्मा । Bü °हृतं st. °हत°, r[1] schw. ॥

युद्धे निरुद्धदिनकृत्किरणप्रचारं
नाराचमण्डपमसौ गगने तनोति ।
तेजो वितानयति तीव्रमरातिराष्ट्रे
कीर्तिं कृती विततनति त्रिषु विष्टपेषु ॥ ५९ ॥
सर्वायसं करिणि मुञ्चति कङ्कमन्त्वं
दीप्रं च मोचयति तद्बलमम्बकाग्रे ।
संख्येषु मोक्षयति यश्च शरं मनुष्ये
स्वां स्वां भुवं प्रतिगते विदितास्त्रवेदः ॥ ६० ॥
यो मार्ष्टि मृद्भिरुदकैश्च बहिः शरीर-
मन्तश्च मार्जति पवित्रतरान्नपानैः ।
संसारदोषकलुषीकृतमात्मतत्त्वं
ज्ञानेन मार्जयति यश्च विशुद्धसत्त्वः ॥ ६१ ॥
उत्कण्ठते न हृदयं प्रमदासु यस्य
नोत्कण्ठति क्षणसुखेषु च कौतुकेषु ।
उत्कण्ठयत्यविरतं पुनरात्मतत्त्वं
सम्यक्प्रबोधमधुपानरसायनेषु ॥ ६२ ॥
धृष्णोति तस्य न कविर्न च पण्डितो ऽग्रे
सर्वस्य धर्षति धियं विदुषो विवादे ।

---

५९) Vasantatilakâ. cfr. β 92. Bü वितनुति ॥ — ६०) Vasantatilakâ. cfr. β 48. Bü Bh$^{\alpha}$ r[1] दीप्तं, [D r दीप्रं] । Bü r[1] तद्बल° ॥ — ६१) Vasantatilakâ. cfr. β 55. Bh$^{\alpha}$ °तरात्तपानैः । Bh$^{\alpha}$ विबुद्ध° st. विशुद्ध° । Bü °तत्वः st. °सत्त्वः, wohl त aus प verbessert, r[1] schweigt. ॥ — ६२) Vasantatilakâ. cfr. β 89. Bh$^{\alpha}$ क्षणमुखेषु, r[1] schw. ॥

एको ऽपि यः सकलशत्रुसमूहमाजा-
वाक्रम्य धर्षयति दुर्धरबाहुवीर्यः ॥ ६३ ॥
यो वृत्यते विषमवैदिकवाक्यजात-
मात्मीयया प्रतिभया जितवृत्तिकारः ।
भृत्येषु वर्तयति यश्च समानदृष्टिः
शिष्टेषु बान्धवजनेष्विव वर्तते यः ॥ ६४ ॥
यो वर्धते विधुरिवाखिलदिङ्मुखेषु
शश्वत्प्रसारितकरः कमनीयकान्तिः ।
धर्मेण वर्धयति यस्य च धीर्विशुद्धा
युद्धे विवर्धयति यश्च रिपूत्तमाङ्गम् ॥ ६५ ॥
वप्राणि लोटयति लुट्यति गोपुराणि
प्राकारचक्रमतिलोटति लोष्टतुल्यम् ।
यो विद्विषां द्विरदधीरबलो बलीया-
न्दुर्गेषु दुर्गतजनोद्धरणैकबुद्धिः ॥ ६६ ॥
अर्थं प्रयच्छति सदर्थिजनाय नित्यं
दीदांसते दुरितमुग्रतरैस्तपोभिः ।
यश्चावदानयति दानवकक्षतुल्यं
साक्षादधोऽक्षज इव प्रतिपक्षचक्रम् ॥ ६७ ॥

---

६३) Vasantatilakâ. cfr. β 87. — ६४) Vasantatilakâ. — ६५) Vasantatilakâ. cfr. β 80. Bü D Bh^α युद्धेषु वर्धयति, r[1] nicht zu entscheiden ॥ — ६६) Vasantatilakâ. cfr. β 107. Bü अभि° st. अति°, r अभिलोटति । लुट ... अतिपूर्वः, [D Bh^α r[1] अति°] । Bü Bh^α लोष्ठ°, [D r लोष्ट°] । D Bh^α °वीर° st. °धीर°, r r[1] schweigen. ॥ — ६७) Vasantatilakâ. r सदर्थं°, D समर्थं° st. सदर्थि°, r[1] schw. । Bh^α °यक्ष°, D °पक्ष°, Bü °कक्ष° st. konjic. °काक्ष°, r r[1] schw. ॥

वातोद्धतो जलनिधेर्मलयोपकण्ठे
यं शीकते शिशिरशीकरवारिवर्षैः ।
शीकन्ति सिन्धुसलिलानि हिमाद्रिपार्श्वे
मन्दाकिनीजलकणा अपि शीकयन्ति ॥ ६८ ॥

खेलन्ति लीलागतिविभ्रमेण यद्वारनार्यो जितराजहंसाः ।
क्ष्वेलन्ति पौराः सह सुन्दरीभिः सुखं च खेलायति भृत्यवर्गः
॥ ६९ ॥

यद्वस्तु शुच्यति न तत्किल भक्षणीय-
मित्यागमस्थितिभिदां चरितं नृपाणाम् ।
यः शोचति श्रुतिनिवेदितमार्गसेवी
ज्ञानेन शुच्यति सदा हृदयं च यस्य ॥ ७० ॥

कश्चिन्न कौति करणैरुपपीड्यमान-
स्तस्य प्रजासु कुवते न च तस्करेण ।
काव्यानि यश्च कवते कविवल्लभो ऽसौ
तं पूजयत्यभिमतैर्विभवैरजस्रम् ॥ ७१ ॥

यस्य बाणनिवहो रणाङ्गणे द्योतिताम्बरतलो ऽभिधावति ।
धावति त्रिदशमन्दिरे यशः कीर्तिरप्यखिलदिक्षु धन्वति ॥ ७२ ॥

---

६८) Vasantatilakâ. cfr. β 185. Bü immer सी°, D सीकंति, r सीकते सोकृ .. शोकंति चीकृ शीकृ .. सीकयंति स एव इमंतः। Bü r °सीकर°, r[1] schw. ॥ — ६९) Upajâti. cfr. β 64. Bh[α] खलंति। D सुर° st. सह, r[1] schw. ॥ — ७०) Vasantatilakâ. cfr. β 208 und β 220. — ७१) Vasantatilakâ. cfr. β 20. Bü r करणैरुप°, r[1] राजग्राह्यभागैः पीडितः सन्। D पूजयत्यपि म°। Bh[α] °मतैर्वि° ॥ — ७२) Rathoddhatâ. cfr. β 128. D °मंदिरं, r[1] schw.। Bü D धावति st. धन्वति, r[1] सर्व धव ध्रव गतौ भ्वादौ ॥

निशितशरसहस्रैश्छादयत्यन्तरिक्षं
छदति रणभुवं यो विद्विषां रुण्डखण्डैः ।
समरविजयलक्ष्म्यालिङ्गितं यच्छरीरं
सुरयुवतिविमुक्तास्छादयन्ति स्रजश्च ॥ ७३ ॥
पतयन्ति रणेषु यस्य बाणाः
सततं तैर्निहताः पतन्ति कायाः ।
चतुरश्चतुरब्धिमेखलाया-
मिह धात्र्यामधिपत्यते च यः ॥ ७४ ॥
प्रथते पृथिवीभुजां विजेतु-
श्चरितं यस्य चतुर्दिशां मुखेषु ।
प्रथयत्यतिथिप्रियस्य कीर्तिः
पृथुवत्प्राथयति स्थिरं यशश्च ॥ ७५ ॥
यतते यतिवद्विमुक्तिहेतो-
रपि शत्रुं न च यातयत्यदोषात् ।
अपराधिषु राजकेषु यश्च
प्रतिनिर्यातयति प्रसह्य वैरम् ॥ ७६ ॥
कोपादसौ शपति भृत्यजनं न कंचि-
त्प्राप्तापराधमपि शप्यति न प्रभुत्वात् ।

---

७३) Mâlinî. cfr. β 16. D भुवि रणं st. रणभुवं ॥ — ७४) Aupacchandasika (doch s. Anm.). cfr. β 49. D Bh$^{\alpha}$ शतशस्त्रै°, Bü शनशस्त्रै° st. सततं तै°, r[1] schw., aber r सततमनवरतं तैः शरैर्निहताः । Bh$^{\alpha}$ °र्निहिताः ॥ — ७५) Aupacchandasika (Vasantamâlikâ). cfr. β 191. Bh$^{\alpha}$ lässt d. zweite Halbstr. aus. D यस्य कीर्त्तिः st. कीर्तिः पृथुवत्, r[1] schweigt । D प्रार्थयति ॥ — ७६) Aupacchandasika (Vasantamâlikâ). cfr. β 75.

कालप्रियाय शपते यतरस्य हेतो-
स्तत्कार्यमाशु कुरुते कुरुतुल्यतेजाः ॥ ७७ ॥
सज्जन्ति कुञ्जरघटाः खलु यत्प्रयाणे
यं संततं युधि परिष्वजते जयश्रीः ।
चेतः समासजति यस्य गुणानुरागा-
द्विद्याविशुद्धहृदये विदुषां समूहे ॥ ७८ ॥
व्यायामशीलः पुरुषो न मेदते
प्रायेण मेद्यत्यकृतश्रमो जनः ।
एवं विदित्वायुधवाजिवारणै-
र्व्यायच्छते यश्च न मेदयत्यतः ॥ ७९ ॥
अज्ञाननिद्रानिबिडोपगूढे राजन्यके वेदयते य एकः ।
सुखानि यो वेदयते सदैव स्वार्थं प्रजा यत्र निवेदयन्ते ॥ ८० ॥
कश्चिन्न कुष्णाति कदर्थितः शुचा
नरो न रोगव्यथितश्च कुन्थति ।
देशे तदीये प्रतिकूलवर्तिनां
शूलस्थितं कुथ्यति केवलं वपुः ॥ ८१ ॥

७७) Vasantatilakâ. cfr. β 179. Bh^{a} किंचि° । Bh^{a} कालप्रियाख्याय शपते नृपतस हेतोस्तत्सार्यमाशु, D कालप्रियाख्या शपते नृपस्य हेतोः स्वतुल्य-मपि यः कुरुते सुतेजाः, r कालप्रियाख्याय । आदित्याय शपते । संभाव्यमानं मिथ्याभावं निरस्यति । अथवा तव पादान्स्पृशामीत्येवं शपथं करोति । किमर्थं । अयतरस्य प्रकृष्टपक्षहेतोर्निरस्तो मिथ्याभावः । आशु शीघ्रं सू[dann त्सा ge-tilgt]र्यं करोति । किंविशिष्टः । कुरुतुल्यतेजाः . . . , r[1] nicht zu entscheiden, s. Anm. ॥ — ७८) Vasantatilakâ. D °हृदयं ॥ — ७९) Indravamçâ. cfr. β 136. Bü D युधि st. °युध° । D यस्य st. यश्च ॥ — ८०) Upajâti. cfr. β 52. Bü r °निबि-डो°, r[1] schw. । D Bh^{a} न st. नि° । Bh^{a} विंदयंते ॥ — ८१) Upajâti (Indravamçâ + Vamçastha, s. α 13). cfr. β 124. D Bh^{a} रोगैर्व्य°, r[1] schw. । Bh^{a} तदीय ॥

अवगुरते न विरुद्धं नोद्गूरयते क्वचिद्वृथाघातम् ।
आगूर्यते जयश्रीरत एव च संमुखं तस्य ॥ ८२ ॥
बोधते ब्रह्मविद्यां यः क्षत्त्रविद्यां च बोधति ।
नित्यमध्यात्मयुक्तात्मा ब्रह्मात्मानं च बुध्यते ॥ ८३ ॥
सर्वो गर्वति विद्याभिर्धनैर्गर्वयते ऽपरः ।
सर्वविद्यस्तु सम्राट् च यो न गर्वायते प्रभुः ॥ ८४ ॥
त्वरते न तथार्थेषु न च कामेषु तूर्यते ।
यथा त्वरयते धर्मे ज्ञात्वासौ जीवितस्थितिम् ॥ ८५ ॥
अर्चते चन्द्रचूडं यो गुरुमग्निं तथर्चति ।
अर्चयत्यनिशं विप्रान्कर्णधाराम्भवार्णवे ॥ ८६ ॥
अनुमीमति दूरस्थं सूक्ष्मं चाप्यनुमीयते ।
यो ऽनुमाययति श्रीमानर्थं त्रैलोक्यगोचरम् ॥ ८७ ॥
दीनेषु दयते नित्यं दयते मेदिनीं च यः ।
दीयन्ते विद्विषो यस्य प्रतापोपनिपीडिताः ॥ ८८ ॥
यो मार्गयति सन्मार्गमपवर्गं च मार्गति ।
सांसारिकं तडित्तुल्यं सुखं मृगयते न तु ॥ ८९ ॥

---

८२) Âryâ (Pathyâ). cfr. β 51. D °यते वृथा क्वचिद्घातं, Bh$^{\alpha}$ °यते वृषा क्वचिद्घातं । Bh$^{\alpha}$ r सम्मुखं, r[1] schweigt ॥ — ८३) = β 53. — ८४) cfr. β 71. Bh$^{\alpha}$ सर्वे गर्वति । D °नैर्गर्व्वायते । D सम्राट् च सर्व्वविद्यस्य नित्यं गर्वायतेपरः, Bh$^{\alpha}$ सम्राट् सर्वविद्यस्य गर्वायते तथा न यः, r सर्वविद्यस्य संम्राट् च तथापि दर्पं न करोति, r[1] schw. ॥ — ८५) cfr. β 257. — ८६) cfr. β 116. Bü D Bh$^{\alpha}$ तथार्च्चति, r r[1] erkl. तथर्चति und तथार्चति, s. Anm. । Bü अर्च्चयतेनिशं, r अर्च्चयते, erkl. aber Parasm., s. Anm. ॥ — ८७) cfr. α 29, β 39, β 79 Note, β 143, β 183. — ८८) cfr. β 84. — ८९) cfr. β 90. Bh$^{\alpha}$ ननु st. न तु ॥

न हिनस्ति वृथा जन्तूंस्तृणान्यपि न हिंसति ।
परं स हिंसयत्येकं यस्तदाज्ञां विलङ्घते ॥ ९० ॥
बीभत्सते परस्त्रीभ्यो यो बध्नाति रतिं रणे ।
बन्धयन्ति न दुःखार्ताः केशानप्यरियोषितः ॥ ९१ ॥
धर्माय व्यययत्यर्थं यश्च व्ययति कीर्तये ।
प्रेम्णा यस्य यशः पृथ्वी संव्ययत्युत्तरीयवत् ॥ ९२ ॥
मुटति द्विषतां दर्पं स्त्रीणां मानं च मोटति ।
मोटयत्यक्षरज्ञानगर्वं यो वादिनामपि ॥ ९३ ॥
अर्जते धर्ममेवैकमर्थं धर्मार्थमर्जति ।
अर्जयत्यूर्जिताँल्लोकान्यो धर्मेणैव शाश्वतान् ॥ ९४ ॥
जिह्रेति नीचसंगत्या ह्रीच्छत्यनृतभाषणात् ।
यो नामग्रहणादेव स्वैरिणीनां ह्रणीयते ॥ ९५ ॥
क्रन्दन्त्यश्रुजलोत्पीडैः क्रन्दन्ते शोकविक्लवाः ।
आक्रन्दयन्ति दैवं च वैधव्याद्यदरिस्त्रियः ॥ ९६ ॥
लक्ष्म्या नोल्ललते प्रेम्णा लालयते ऽनुजीविनम् ।

---

९०) cfr. β 57. Bü हिंसयत्येनं । Bh$^{\alpha}$ तदाज्ञा ॥ — ९१) cfr. β 54. D Bh$^{\alpha}$ केशान्यदरि°, r r[1] unentschieden ॥ — ९२) cfr. β 117. D धर्माये व्यत्ययत्यर्थं, Bh$^{\alpha}$ धर्माय ययत्यर्थं, Bü धर्म्माय यो व्ययत्यर्थं, r व्ययति, erkl. aber richtig व्यययति, r[1] als Strophencitat धर्माय व्यत्ययतीति, erkl. aber richtig, r r[1] erwähnen ausserdem die Möglichkeit, die erste Verbalform mit आ zu schreiben, cfr. Dhâtup. 32, 95, s. Anm. । Bh$^{\alpha}$ यस्व ययति कीर्त्तय ॥ — ९३) cfr. β 104. — ९४) cfr. β 100. — ९५) cfr. β 58. Bü ह्रिणी° ॥ — ९६) cfr. β 72. D Bh$^{\alpha}$ शोकविह्वलाः, r unentschieden, r[1] क्रदुक् .. वैक्लव्ये भ्वादौ शोकेन वैक्लवाः स्युरित्यर्थः । r[1] zur zweiten Halbstr. देवशब्दं उच्चारयंतीत्यर्थः ॥

लालयत्यतिमात्रेण ललनां न कदाचन ॥ ९७ ॥
लङ्घते न गुरोराज्ञां न च लङ्घयति स्थितिम् ।
अव्याधिरतिदीप्ताग्निर्यः कदाचिन्न लङ्घति ॥ ९८ ॥
न सीदति क्वचित्कार्ये नासादयति संशयम् ।
नासीदति भ्रमं यस्य बुद्धिः सर्वातिशायिनी ॥ ९९ ॥
गर्हते न तथा श्वानं चण्डालं च न गर्हति ।
गर्हयत्याहवे भग्नं यथासौ क्षत्रियं नरम् ॥ १०० ॥
प्रापयन्ति यतः सर्वे प्रार्थ्यमानार्थमर्थिनः ।
स तेभ्यः प्रापति श्रेयः कीर्त्या चाप्नोति रोदसी ॥ १०१ ॥
न प्रगल्भायते क्वापि न च दम्भात्प्रगल्भति ।
अर्थे शास्त्रे च स सम्यक्कृतबुद्धिः प्रगल्भते ॥ १०२ ॥
क्लीबते कश्चिदर्थेषु कश्चित्क्लीब्यति जीविते ।
अर्थप्राणव्यये प्राप्ते नासौ क्लीबायते क्वचित् ॥ १०३ ॥
गाधते न परद्रव्यं न गृध्यति परस्त्रियम् ।
गर्धयन्ति ततः सर्वे स्वाभिप्रेतार्थमर्थिनः ॥ १०४ ॥

---

९७) cfr. β 103. D Bh$^{\alpha}$ नोल्लभते, r[1] भोल्लभते, so aber nur im Strophen-citat । D लालयत्यनुजीविनः ॥ — ९८) cfr. β 67. Bh$^{\alpha}$ लंघयते स्थितिं । D °तिदीर्घाग्निम् यः । D कदापि न, r[1] कदाचिदपि लंघनं न करोति ॥ — ९९) cfr. β 77. — १००) cfr. β 108. Bh$^{\alpha}$ चांडालं, r[1] schweigt ॥ — १०१) cfr. β 66. D प्राप्नोति, Bh$^{\alpha}$ व्याप्नोति, r[1] unentschieden ॥ — १०२) cfr. β 153. D Bh$^{\alpha}$ दंभात्प्रगल्भते, wie r[1] gelesen hat, kann ich nicht sicher entscheiden, wohl Âtm., s. Anm. । D च सम्यग्यः कृत°, Bh$^{\alpha}$ च संम्यक् यः कृत°, r nur सम्यक्कृतबुद्धिः निश्चितबुद्धिर्यतः, r[1] schw. ॥ — १०३) cfr. β 85. Bh$^{\alpha}$ lässt die Strophe aus. Bü r stets क्लीव°, r[1] क्लीबते इति क्लीबृङ् . . . क्लीब . . . क्लीब . . ॥ — १०४) cfr. β 270 und β 256. D गोधते, r[1] गोधते न परेति गोधृङ् . ., r गाधते गोध [wohl nur st. । गाधृ] . . । D Bh$^{\alpha}$ यतः, r[1] यस्माद्राज्ञः ॥

स्वदते मधुसंपर्के स्वादते सोममध्वरे।
आस्वादयति दीप्ताग्निर्गुरु वृष्यं च भोजनम् ॥ १०५ ॥
खिद्यते यो न भृत्येषु याचकेषु न खिन्दति।
खिन्ते तेष्वेव ये द्रव्यं दीयमानं न गृह्णते ॥ १०६ ॥
डिपन्ति यस्य मातङ्गा डिप्यन्ति च तुरंगमाः।
डेपयन्ति च पादाता युद्धे निम्नोन्नतां भुवम् ॥ १०७ ॥
चुट्यन्ति सर्वसंदेहास्चुटन्ति ग्रन्थयो हृदि।
चुटति ब्रह्मविज्ञानाद्यस्य संसारबन्धनम् ॥ १०८ ॥
चित्तं रजति नारीणां स्वयं तासु न रज्यति।
राजते तस्य भोजंगी वृत्तिः सर्वातिशायिनी ॥ १०९ ॥
निषेधति तदीयाज्ञां यः कश्चित्कालचोदितः।
तं सेधति स दण्डेन तेन सर्वत्र सिध्यति ॥ ११० ॥
सहते शस्त्रसंपातं सहति श्रममाहवे।
उत्साहयति यश्चित्तमपि जेतुं शचीपतिम् ॥ १११ ॥
नित्यमाद्रियते धर्मे न कुतो ऽपि दरत्यसौ।

---

१०५) cfr. β 119. Bhα मध्य° st. मधु°। Bhα D °संपर्क्के, r r[1] schw.। D दीर्घाग्नि°। D गृध्यं, Bhα गृध्य st. वृष्यं, r schw., r[1] गुरुणा बृहस्पतिना गृध्यते ऽभिलष्यत इति गुरुगृध्यः ॥ — १०६) = β 68. — १०७) cfr. β 96. — १०८) cfr. β 38. Bhα stets तु° st. चु°। r zur dritten Verbalform चुटति चुट कलहकर्म्मणि तुदादौ परस्मैपदी [s. aber Dhâtup. 28, 83] ... संसारबंधनं विनश्यति, r[1] चुटत् कालहकर्मणि तुदादौ विनश्यतीत्यर्थः ॥ — १०९) cfr. β 264. D स्वयं चासु न, r[1] schw.। r रज्यते, r[1] unentschieden। D Bhα राजते यस्य, r[1] schw. ॥ — ११०) cfr. β 272. Bü कश्चित्कालप्रचोदितः st. यः — °चोदितः, r[1] unentschieden, D Bhα °नोदितः, r यस्तदीयां चाज्ञां निराकरोति सः कालेन यमेन चोदितः, r[1] unentschieden ॥ — १११) cfr. β 31. Bü यश्चित्त°। D °पतिः, Bhα °पति, Bü °मतिं ॥

दृणाति यद्रणोद्योगे विद्विषां हृदयं भयात् ॥ ११२ ॥
आजोडयति शत्रूणां श्रियं जित्वा हठेन यः ।
जुडत्येकच तान्सर्वाञ्छृङ्खलाभिश्च जोडति ॥ ११३ ॥
अश्नाति यः पुरोडाशमश्वमेधे महाक्रतौ ।
अश्नुते फलमक्षय्यं श्रिया शक्र इवासति ॥ ११४ ॥
नयते नीतिमार्गेण नयते विद्विषः क्षयम् ।
स नृणाति नृणां नाथो नोत्पथेन कथंचन ॥ ११५ ॥
विच्छायत्यनवच्छिन्ना यस्य बाणावली रणे ।
विच्छयन्ति द्विषो दिक्षु कीर्तिः स्वर्गे च विच्छति ॥ ११६
राध्नोति पितृदेवार्थमध्वगार्थे च रध्यति ।
तद्देशे सुस्थितो लोकस्तेन राध्यति तत्कुलम् ॥ ११७ ॥
न धर्माद्भ्रंशते श्रौतान्न च भ्रश्यति लौकिकात् ।
भृशायते च सर्वेषां विपक्षाणां क्षयाय यः ॥ ११८ ॥
शालन्ते शालिकेदारान्यद्देशे पथिकाः पथि ।

---

११२) cfr. β 73. D धर्मे कुतोपि न दृ°, r स नृपः कुतोपि न बिभेति. r[1] schweigt । Bh$^{\alpha}$ °द्योगैर्वि°, r r[1] schw. ॥ — ११३) cfr. β 113. D Bh$^{\alpha}$ हत्वा st. जित्वा, r r[1] schw. । Bh$^{\alpha}$ जुडत्येवाच । r zum 4. pâda एकशृंखलया संबद्धान्करोति [r[1] शृंखलाभिः] ॥ — ११४) cfr. β 268. D इवाश्नति, r[1] letzte Wurzel अश्नो अषी ॥ — ११५) cfr. β 273. — ११६) cfr. β 120. D विच्छाययत्यविच्छिन्ना, r[1] im Strophencitat und in der Erkl. विच्छाययतीति, analysiert aber विच्छायति, Bh$^{\alpha}$ विच्छायत्यत्यनवच्छिन्ना । Bü अनविच्छिन्ना, r अनविच्छिन्ना विच्छेदरहिता, r[1] schw. ॥ — ११७) cfr. β 114. r[1] nennt die zweite Wurzel राधौ । Bh$^{\alpha}$ तद्देशेषु स्थितो, r r[1] schw. ॥ – ११८) cfr. β 178. Bü भ्रंसते, r भ्रंसते . . भ्रंस [über भ्रंस ist श geschr.]। Bü भ्रस्यति? [स्य durch eine Änderung], r भ्रस्यति भृश भ्रंश अधःपतने ॥

शलन्ते शनकैः केचित्पश्यन्तो न शलन्ति च ॥ ११९ ॥
स्तम्भते पुरुषः प्रायो यौवनेन धनेन च ।
न स्तभ्नाति क्षितीशो ऽपि न स्तभ्नोति युवाप्यसौ ॥ १२० ॥
स्तोभते स्तुतिवाक्यैस्तु सर्वः स्तुभ्नाति चाटुभिः ।
स्तुतिचाटुसहस्रैस्तु नासौ स्तुभ्नोति धीरधीः ॥ १२१ ॥
विष्कम्भते शरैः शत्रून्विष्कभ्नाति शुभैरघान् ।
विष्कभ्नोति पुनर्जन्म ब्रह्माभ्यासेन यः सदा ॥ १२२ ॥
यः स्त्रिष्यति श्रियं प्रेम्णा स्रेषति द्विषतां पुरम् ।
दुःश्लिष्टान्यपि कार्याणि श्लेषयत्यचिरादिव ॥ १२३ ॥
तस्मै द्रुह्यति यः कश्चित्तस्मै स प्रतिदोहति ।
दोग्धि पृथ्वीं पृथुश्रीकश्चतुरम्भोनिधिस्तनीम् ॥ १२४ ॥
पिबन्ति सीधु पीवन्ति पीयन्ते च प्रियाननम् ।
यत्प्रसादादविज्ञातस्वपरोपद्रवाः प्रजाः ॥ १२५ ॥
यो वक्ति सर्वभाषाभिर्वाचयत्यखिलां लिपिम् ।
वचति श्रुतिशास्त्राणि कस्तेन सदृशो ऽपरः ॥ १२६ ॥
संवादयति यो विप्रान्दूरस्थान्संप्रदित्सया ।

---

११९) cfr. β 101. D r[1] im Strophencitat शालंति, r[1] erkl. aber Âtm., s. Anm. । r[1] liest die zweite Wurzel mit आ । D Bh$^{\alpha}$ वा st. च, r r[1] erwähnen das Wort nicht, Näheres s. Anm. ॥ — १२०) cfr. β 82. D पुरुषप्रायो, r[1] Strophencitat स्तंभते पुरुषेति [nicht पुरुष इति], schweigt in d. Erkl. ॥ — १२१) cfr. β 129. — १२२) cfr. β 81. Bh$^{\alpha}$ शत्रु वि° । D Bh$^{\alpha}$ शुभैरघान्, r[1] schlägt vor, अघान् [geschr. अघानीति st. अघानिति] in अघम् zu ändern, r schw. ॥ — १२३) cfr. β 61. — १२४) D सं° st. स ॥ — १२५) cfr. β 65. D Bh$^{\alpha}$ r[1] im Strophencitat पीबंति st. पीवंति, r[1] in d. Erkl. पीव । D पायंति च प्रियाननम् । Bü °दादवज्ञात°, r[1] schw. ॥ — १२६) cfr. β 94. Bh$^{\alpha}$ श्रुत° ॥

योद्धुं संवदते शत्रून्सर्वेच वदति प्रियम् ॥ १२७ ॥
कृणत्ति द्विषतां दुर्गं शिरस्तेषां निकृन्तति ।
कीर्तयन्ति गुणान्यस्य विस्मयेन दिवौकसः ॥ १२८ ॥
यस्य न श्रथयत्यङ्गं सामर्थ्ये श्रथते न च ।
योगबद्धाभियोगस्य कर्मबन्धः श्रथायते ॥ १२९ ॥
अर्दते निर्दयं शत्रूनर्दति स्वैरिणोरतान् ।
यः स्तोकेनापराधेन न चार्दयति कंचन ॥ १३० ॥
भक्षयन्त्यस्थि भक्षन्ति मांसं भ्लक्षन्ति शोणितम् ।
यत्खड्गखण्डिताङ्गानां शत्रूणां कौणपा रणे ॥ १३१ ॥
यद्दृष्टिगोचरे स्थित्वा हिण्डन्ते च हिलन्ति च ।
पौरनारीसहस्राणि यश्च तान्यवहेलते ॥ १३२ ॥
वण्टन्ति हाटकं यस्मात्प्रतिगृह्य द्विजातयः ।
वण्टयन्ति च रत्नानि ग्रामान्वण्टापयन्ति च ॥ १३३ ॥
ये मूषन्ति परद्रव्यं तेषां मुष्णाति यः शिरः ।
मुष्यत्यपहृतार्थानां दुःखं च द्रविणार्पणात् ॥ १३४ ॥
वयन्ति चारुचीनानि व्ययन्ते पट्टपट्टिकाः ।

---

१२७) cfr. β 99. Bh$^{\alpha}$ दूरस्थान्यो विप्रान् st. यो — ०स्थान्, r r[1] unentschieden । Bü संप्रदिच्छया, D संपदिच्छया, r deutet auf संप्रदित्सया, r[1] unentschieden ॥ — १२८) cfr. β 122. Bh$^{\alpha}$ D यो द्विषां st. द्विषतां, r[1] schw. Bh$^{\alpha}$ दर्प्पं st. दुर्गं ॥ — १२९) cfr. β 171. D स्रंथते, r[1] nicht zu entscheiden D Bh$^{\alpha}$ योगे, r r[1] schw. ॥ — १३०) cfr. β 118. D निर्द्दयः, r[1] schw. । Bh$^{\alpha}$ किंचन ॥ — १३१) cfr. β 102. r[1] will statt भषंति lieber भिषंते lesen s. Anm. । Bh$^{\alpha}$ भषंति st. भ्लक्षन्ति । Bü Bh$^{\alpha}$ r कोणपा, r[1] schw. ॥ — १३२) cfr. β 111. — १३३) cfr. β 78. — १३४) cfr. β 115. r[1] im Strophencitat ये मूषंतीति, in d. Erkl. मुष् .. भ्वादौ । r मुष्यति मुश खंडने, s. aber Anm. ॥

वयन्ते चित्रपत्तोर्णं यत्कृते शिल्पिनः सदा ॥ १३५ ॥

विष्णुः खायति खड्गेन खट्वाङ्गेन खदत्यजः ।
दन्तैः खादन्ति योगिन्यो यस्याग्रे संगरे रिपून् ॥ १३६ ॥

यस्योद्याने कुसुमसुरभिर्वाति नित्यं नभस्वा-
न्वायत्यम्भःकणपरिचितः शीतलो दीर्घिकासु ।
येन स्पृष्टान्यविरतरतक्रीडया क्लान्तिभाजा-
मुद्वायन्ते श्रमजलजुषां योषितामङ्गकानि ॥ १३७ ॥

नानार्थसंशयपदे पतिता नराणां
प्रायेण दोलयति धीस्तरलस्वभावात् ।
दोलायते न खलु तस्य मतिः कदाचि-
त्कृच्छ्रेऽपि कार्यविषये स्थिरनिश्चयस्य ॥ १३८ ॥

यो दह्यमानमलयाधिपराजधानी-
धूमोच्छलद्बहलचन्दनसौरभेण ।
धूपायतीव गगनेचरमृक्षचक्रं
स्वर्गस्थितानपि च धूपयतीव देवान् ॥ १३९ ॥

प्रणिङ्क्ते दक्षिणीयानां विप्राणां चरणौ च यः ।
यत्पादौ मुकुटज्योत्स्नाजलैर्नेनेक्ति राजकम् ॥ १४० ॥

---

१३५) cfr. β 215. D °चीराणि, r r[1] schweigen । Bh$^{\alpha}$ पठपट्टिकाः । Bh$^{\alpha}$ °यत्तोर्णं सत्कृते ॥ — १३६) D r[1] im Strophencitat विष्णुः खादति, r[1] erkl. aber खायति, Bh$^{\alpha}$ विष्णुः खाति । D दंतैः खदंति ॥ — १३७) Mandâkrântâ. cfr. β 216. — १३८) Vasantatilakâ. cfr. β 212. D पततां नराणां, r r[1] schw. । Bü तरलस्वभावात्, स्व vielleicht nur missratenes ख, r r[1] schw. ॥ — १३९) Vasantatilakâ. D Bh$^{\alpha}$ °धूपो° st. °धूमो°, r r[1] schw. । D Bh$^{\alpha}$ °बहुल°, r r[1] schw. ॥ — १४०) cfr. β 132. D दीपिणी°, Bh$^{\alpha}$ दक्षणी°, क्ष aus षि geändert ॥

मृद्गाति विद्विषां दर्पं यो भुजाभ्यां भुवः पतिः ।
मर्दन्ते चरणौ यस्य प्रतापोपनताश्च ते ॥ १४१ ॥
पूजामर्हति सर्वेषामृषीणामाश्रमेषु यः ।
अर्हयत्यर्घसत्कारं मधुपर्कं च पावनम् ॥ १४२ ॥
प्राणिनामुपकाराय प्राणिति प्रियदर्शनः ।
प्राणयते पुण्यपुरुषः श्रेयसे यशसे च यः ॥ १४३ ॥
यो वाग्मी वादिनां मध्ये वाचमुच्चैः प्रपञ्चते ।
प्रपञ्चयति यत्कीर्तिं दिङ्मुखेषु महाजनः ॥ १४४ ॥
छिनत्ति संशयं शास्त्रे विदुषां सूक्तिभिः सदा ।
छेदयत्यसिधाराभिर्विद्विषां मस्तकं च यः ॥ १४५ ॥
उड्डीयन्ते शरा यस्य कोटिशः समराङ्गणे ।
भग्नानामरिसैन्यानामुड्डयन्ते रजांसि च ॥ १४६ ॥
संदधाति धनुर्ज्यायां यदैवेषुं रुषान्वितः ।
तदैव तद्भयाक्रान्ताः संधयन्ति धराधिपाः ॥ १४७ ॥
स्निह्यति ज्ञातिवर्गेषु संगतेषु न केवलम् ।
सकृद्दृष्टे ऽपि शिष्टे यः स्नेहयत्यधिकं ततः ॥ १४८ ॥

---

१४१) cfr. β 144. Bü मृद्गाति यो द्विषां । Bü तस्य st. यस्य, ये st. ते r ते विद्विषस्तस्य चरणौ मर्हयंति, r[1] ते ऽरय[ो] मर्दयंतीत्यर्थः, Bh$^{\alpha}$ °नता शुभे ॥ — १४२) cfr. β 254. D अर्हयत्यघसंस्कार, Bh$^{\alpha}$ अर्हयत्यघसंस्कारं r r[1] schweigen ॥ — १४३) cfr. β 174. r प्राणते अन प्राणने, s. Anm. D °पुरुष ॥ — १४४) = β 147. — १४५) cfr. β 248. — १४६) = β 14[3] Bü wohl अपि st. अरि°, r r[1] schw. ॥ — १४७) cfr. β 131. Bü धनुर्ज्यायां D Bh$^{\alpha}$ यदैवेषून्, r r[1] schw. । D Bh$^{\alpha}$ तं भया° ॥ — १४८) cfr. β 246 Bh$^{\alpha}$ शब्दे, D स्निग्धे st. शिष्टे, r r[1] schw. । Bh$^{\alpha}$ D स्नेहयत्यंधकं ॥

हते भर्तरि वैक्लव्यात्क्लिन्दन्ते यदरिस्त्रियः ।
अजस्रैरश्रुभिस्तासां क्लिद्यन्ति नयनानि च ॥ १४९ ॥
नालिङ्गति नरः कश्चिदन्यायं यस्य मण्डले ।
आलिङ्गयति सर्वो ऽपि कान्तां प्रेमभरालसाम् ॥ १५० ॥
नावद्यं घोषति द्वारे तस्य कश्चिदुपद्रुतः ।
घोषयन्ति परं सर्वे दीर्घमायुर्मुदान्विताः ॥ १५१ ॥
यस्य व्याघोटते व्यूहो नाकृतार्थः कुतश्चन ।
व्याघुटत्यरिवर्गस्तु यः संमुखमुपागतः ॥ १५२ ॥
व्याहोडते हतं येन शरैरहितहास्तिकम् ।
व्याहोडति तथाश्वीयं पादातं च भयातुरम् ॥ १५३ ॥
संविभाजयति श्रीमान्यो वित्तेन द्विजोत्तमान् ।
धर्मषष्ठांशभागेन ते ऽपि संविभजन्ति तम् ॥ १५४ ॥
अदृष्टविषये प्रायः सर्वेषां मन्दते मतिः ।
मन्दायते नरेन्द्रस्य धर्मकार्ये न तस्य धीः ॥ १५५ ॥
मनो नोद्विजते यस्य ददतो ऽर्थमहर्निशम् ।

---

१४९) cfr. β 130. D क्लांदंते, Bh^α क्लिदंति [क्लि aus क्लिं geändert], Bü क्लिदंते, r क्लिदंते, erkl. aber क्लिन्दन्ते । D क्लिधंते ॥ — १५०) cfr. β 243. D Bh^α अपायं st. अन्यायं, r r^1 schweigen । D आलिंगयंति सर्वेपि कांतं प्रेमभरालसाः, Bh^α आलिंगति च यं सर्वे कांताः प्रेमभरालसाः, r Sing. आलिंगयति, r^1 ... चुरादौ, sonst aus r r^1 nichts zu ersehen ॥ — १५१) cfr. β 141. Bh^α उपहतः ॥ — १५२) cfr. β 146. D नान्यूनाऽर्थः, Bh^α नानूर्धः तश्चनः । D व्याघुव्यत्यरि° । D Bh^α °वर्गस्तो यः ॥ — १५३) D r^1 im Strophencitat व्याहोडति, r^1 erkl. aber richtig Âtm., s. Anm., in Bü ते aus ति verbessert । D भयान्वितम् ॥ — १५४) r संविभाजयति, analysiert aber सविभजयति । D सर्वे st. ते ऽपि । D यम् st. तम्, auch r तं ॥ — १५५) cfr. β 173. Bh^α °कार्येषु नास्य, r nur तस्य धोर्धर्मकार्येषु न जडा भवति ॥

उद्विजन्ति तु संसारादसारात्तत्त्ववेदिनः ॥ १५६ ॥
क्षिप्यति क्षितिपालेषु यो दण्डं चण्डपौरुषः ।
क्षिपन्ति क्षितिपालाश्च तस्य कार्यमनारतम् ॥ १५७ ॥
क्रीडन्ति कामिनो नित्यं किलन्ति च मृगेक्षणाः ।
स्वर्लोकदुर्लभैर्भोगैर्यस्य राष्ट्रे निरङ्कुशाः ॥ १५८ ॥
अविद्यानिद्रयाक्रान्ते जगत्येकः स चेतति ।
नित्यं चेतयते योगी ब्रह्मात्मानं सनातनम् ॥ १५९ ॥
न लुभ्यति मनो यस्य विषयेषु विनाशिषु ।
लुभति ब्रह्मविद्यायां नित्यानन्दरसायने ॥ १६० ॥
तपसा भर्जते पापं सुलभं पार्थिवस्य यः ।
अनादिकर्मबीजं च ब्रह्मज्ञानेन भृज्जति ॥ १६१ ॥
न क्षाम्यति क्षितीशानामपराधकणानपि ।
अपराधसहस्राणि क्षमते यो द्विजन्मनाम् ॥ १६२ ॥
आलोकते जगत्सर्वमात्मन्येव प्रतिष्ठितम् ।
आलोकयति चात्मानं सर्वत्र जगति स्थितम् ॥ १६३ ॥
तोलयत्यतुलं शक्त्या यो भारं भुवनेश्वरः ।
कस्तं तुलयति स्थाम्ना राष्ट्रकूटकुलोद्वहम् ॥ १६४॥

---

१५६) cfr. β 149. D Bh$^{\alpha}$ तस्य, Bh$^{\alpha}$ ददतोर्घम॰। Bü तत्वदर्शनात् ॥ — १५७) cfr. β 195. Bü चंडपूरुषः। Bü तस्य कांर्थम॰ oder कांर्घम॰, r कांपं दंडं द्रव्यं, r^{1} कार्थं दंडद्रव्यं ॥ — १५८) cfr. β 235. D निराकुलः, Bh$^{\alpha}$ निराकुलाः ॥ — १५९) cfr. β 126. — १६०) cfr. β 267. D यस्य विनयेषु। D ॰विद्यानां ॥ — १६१) cfr. β 97. D Bh$^{\alpha}$ पार्थिवस्य यः ॥ — १६२) cfr. β 169. D यो महात्मनाम् ॥ — १६३) cfr. β 250. — १६४) cfr. β 206. D Bh$^{\alpha}$ ॰लोद्भवम् ॥

एको ऽपि यः सृजत्याजौ शरजालमनेकधा ।
पुष्पवृष्टिं च यन्मूर्ध्नि सृज्यन्ते सुरयोषितः ॥ १६५ ॥
प्रायः क्लिश्नाति सर्वो ऽपि विषयैरुपपीडितः ।
न क्लिश्यते स एवैको योगाभ्याससुखे रतः ॥ १६६ ॥
यो न हृष्यति संपत्त्या महत्यापि महीपतिः ।
श्रुत्वा परगुणोत्कर्षं यथा हर्षति निर्भरम् ॥ १६७ ॥
मिलन्ति सर्वसैन्यानि यस्योद्योगे यथा यथा ।
मीलन्ति शत्रुनारीणां नयनानि तथा तथा ॥ १६८ ॥
हूयमानहविर्गन्धिः पवते पवनः शुचिः ।
यद्विसृष्टाग्रहारेषु पुनीते सततं प्रजाः ॥ १६९ ॥
आलोचते समं वृद्धैः स नीतिं भूपतिर्यतः ।
आलोचयति चात्मानं चेतसैव गुहाशयम् ॥ १७० ॥
न निन्दति नरं कंचिच्छिष्टाचारादपि च्युतम् ।
नेदते दुःखदुष्पारे संसारे पतितं जगत् ॥ १७१ ॥
आतन्वन्ति मखे यस्य योगाभ्यासरता द्विजाः ।
आतन्वन्ति दिगन्तेभ्यो विप्राः प्रतिजिघृक्षवः ॥ १७२ ॥

---

१६५) cfr. β 168. Bh$^{\alpha}$ राजाजालम्, D राजभारम् st. शरजालम् ॥ — १६६) cfr. β 93. Bh$^{\alpha}$ प्रायः क्लिश्नति । D Bh$^{\alpha}$ न क्लिश्नति, [r[1] क्लिशिंच् उपतापे दिवादौ] ॥ — १६७) cfr. β 211. Bü परं । Bü तथा ॥ — १६८) cfr. β 145. D तस्योद्योगे । D रिपुनारीणां ॥ — १६९) cfr. β 181. D Bh$^{\alpha}$ °र्गंधैः । Bh$^{\alpha}$ प्रजा ॥ — १७०) cfr. β 250. Bü Bh$^{\alpha}$ नीति । D Bh$^{\alpha}$ भूपतिः पतिः । D Bh$^{\alpha}$ गुहाश्रयं ॥ — १७१) cfr. β 150. D निंदते st. नेदते । Bü दुःखदुःपारे, D दुःखदुःप्रापसंसारे, Bh$^{\alpha}$ दुःखसंतापसंसारे ॥ — १७२) Bh$^{\alpha}$ मुखे । D °प्रास्ते ते जि°, Bh$^{\alpha}$ °प्रास्ते त जि°, r प्रतिजिघृक्षवः ग्रहीतुमिच्छवः, r[1] nur ग्र° ॥

यो मिमीते जगत्सर्वं प्रमाणैः शास्त्रसंमितैः ।
न माति मानिनो यस्य यशस्त्रिभुवनोदरे ॥ १७३ ॥
न दुनोति दयालुत्वाद्वचसा कंचिदप्यसौ ।
दुरुक्तैरपि दीनानां मनस्तस्य न दूयते ॥ १७४ ॥
ध्रुवति ध्रुववद्यस्य कीर्तिः सर्वत्र शाश्वती ।
ध्रवन्ति जयस्तम्भाश्च दिक्षु यद्दण्डनायकाः ॥ १७५ ॥
धोरन्त्याधोरणाक्रान्ता विनीता यस्य वारणाः ।
धूर्यन्ते धुर्यमुख्याश्च सादिभिः साधु साधिताः ॥ १७६ ॥
विलसन्ति सुखं यस्य संतुष्टा मित्रबान्धवाः ।
तेषां गृहेषु लोलाक्ष्यो ललना लासयन्ति च ॥ १७७ ॥
लिश्यन्ते शत्रवो यस्य प्रतापाग्निनिपीडिताः ।
नित्यं धर्मावधूनानि लिशन्ति दुरितानि च ॥ १७८ ॥
रसयन्ति फलं स्वादु यदुद्याने ऽप्यवारिताः ।
पत्त्रिणः सुरतोन्मत्तकान्ता इव रसन्ति च ॥ १७९ ॥

---

१७३) cfr. β 79 und β 183. D Bh^α शास्त्रनोदितैः [Bh^α °तेः] ॥ — १७४) cfr. β 258. — १७५) Bü Bh^α D ध्रुवंति st. ध्रवंति, auch r ध्रुवंति, erkl. aber ध्रुव [st. ध्रु] स्थैर्ये भ्वादौ परस्मैपदी, auch Erkl. von r[1] [verstümmelt] weist deutlich auf ध्रवंति । Bü D °स्तंभाश्च, Bh^α जयस्तुंभाश्च, aber r जयस्तंभान् जयशोभिनः स्तंभान्, r[1] nur जयशोभनः ॥ — १७६) cfr. β 139. r[1] nur धोरंत्या इति, Erklärungen fehlen. Bü धौरंत्या°, auch r धौरंति, erkl. धौर्य गतिचातुर्ये ऋदनुबंधः भ्वादौ परस्मैपदी [Dhâtup. 15, 45: धोर्‌ऋ] । Bü Bh^α °धोरणाक्रां° । D धुर्य्यंते । D साधुभिः साधु ॥ — १७७) cfr. β 187. r[1] lässt diese und die nächste Strophe aus, zählt aber richtig weiter. Bh^α लासयंति ॥ — १७८) r[1] s. vor. Str. D क्लिश्यंते । Bh^α नित्य । Bh^α °धूतानि, D °धनाति । D श्लिसंति ॥ — १७९) cfr. β 204. D Bh^α °द्यानेप्यवा° । Bü पर्त्रिणां सुर°, D Bh^α परितः सुर°, s. aber β । Bh^α सुरतासनकांता, D सुरतासन्नकांता ॥

विविनक्ति धिया धर्ममध्यात्मध्यानशुद्धया ।
विवेवेक्ति च वेदान्तान्गूढार्थानपि यः स्वयम् ॥ १८० ॥
सोमं सुनोति यज्ञेषु सोमवंशविभूषणः ।
पुरः सुवति संग्रामे स्यन्दनं स्वयमेव यः ॥ १८१ ॥
सदा मदेन घूर्णन्ति बलिनो ये द्विषां द्विपाः ।
युधि यद्बाणविद्धास्ते घूर्णन्ते दीर्घनिद्रया ॥ १८२ ॥
हल्यन्ति हस्तिपृष्ठेषु कदल्यो यस्य कोटिशः ।
हयन्ति हयमुख्याश्च संख्यातीताः प्रयाणके ॥ १८३ ॥
मोदयन्ति यदुद्याने पुष्पाणां रेणवो दिशः ।
येषां सौरभ्यमाघ्राय मोदन्ते च पुरस्त्रियः॥ १८४॥
मेघगम्भीरनिर्ह्रादं श्रुत्वा यस्य धनुर्ध्वनिम् ।
नदन्ति केकिनो हर्षान्नादयन्ति च चातकाः ॥ १८५ ॥
स्तूपति प्रतिपक्षाणां शिरांसि समराङ्गणे ।
दिक्षु देवकुलव्याजाद्यशः स्तूपयतीव यः ॥ १८६॥
तितिक्षते क्षितीशानां न दर्पमपराधिनाम् ।
यस्तत्कण्ठकठोरास्थिशाणायां तेजयत्यसिम्॥ १८७॥

---

१८०) cfr. β 134. Bh^α^ धियां, D क्रिया st. धिया । D Bh^α^ °ध्यानश्र-द्धया । D वेवेक्ति च वे°, Bh^α^ विवेक्ति चैव वे°, ob r[1] das zweite Verbum mit Präpos. gelesen hat, nicht zu ersehen ॥ — १८१) cfr. β 244. D सोम-वंशविभूषणः । D सवति ॥ — १८२) cfr. β 233. Bü बलिनो यद्विषां ॥ — १८३) cfr. β 167. — १८४) cfr. β 219. D यदुद्यानं ॥ — १८६) cfr. β 154. Bh^α^ सूप्यंति । D देवकुले व्याजाद्यशः स्तूपते च यः, Bh^α^ °व्याजाद्यशः सूपयते च यः, Bü °व्याजात् । यशश्च स्तूपयति यः, cfr. β ॥ — १८७) cfr. β 170. Bü तद्दर्पम° oder तद्दर्पम° st. न दर्पम° । D यः सूत्कंठ° ॥

न स्विद्यति वपुर्यस्य बहून्वाहयतो हयान् ।
न स्वेदयति नाराचान्सहस्राण्यपि मुञ्चतः ॥ १८८ ॥
विचारयति यो धर्मं विद्वद्भिर्ब्राह्मणैः सह ।
विचरत्यत एवास्य कीर्तिस्त्रिभुवनोदरे ॥ १८९ ॥
स्तनति स्निग्धगम्भीरं यत्संगीतेषु गोमुखः ।
तं जेतुमिव पर्जन्यः स्तनयत्यातपात्यये ॥ १९० ॥
यस्य लक्ष्मीपतेः कीर्तिः कुपितेव भ्रमत्यलम् ।
भ्राम्यत्यनुपदीभूतं स्थापत्य इव तद्यशः ॥ १९१ ॥
हस्तिहस्तं क्षुरप्रेण यो मृणाति मृणालवत् ।
नृणां मृणाति कण्ठं च कदलीकाण्डलीलया ॥ १९२ ॥
स्तृणोति बाणजालैर्यो रणे वैरिवरूथिनीम् ।
तच्छिरोभिः स्तृणात्युर्वीं तृणराजफलैरिव ॥ १९३ ॥
वनुते विभवं यस्माद्वनीपकजनः सदा ।
वनन्ति चावनीपाला यत्पादौ लोलमौलयः ॥ १९४ ॥
उत्पटन्ति यथा कृष्टाः करिभिः कदलीद्रुमाः ।
उत्पाटयन्ति निर्मूलं तन्नाराचांस्तथारयः ॥ १९५ ॥
स भुनक्ति भुवं कृत्स्नां प्रतापोपनतद्विषाम् ।

---

१८८) cfr. β 214. Bh$^{\alpha}$ सहस्रानपि, D सहस्रानंपि ॥ — १८९) cfr. β 125. Bh$^{\alpha}$ तु st. त्रि ॥ — १९०) cfr. β 203. D Bh$^{\alpha}$ स्तन॰ st. स्निग्ध॰ । Bü Bh$^{\alpha}$ तज्जेतु॰ ॥ — १९१) cfr. β 265. Bü प्रीतिः st. कीर्तिः, [aber auch r कीर्त्तिः] ॥ — १९२) cfr. β 105. Bh$^{\alpha}$ नृणां मृणाति ॥ — १९३) cfr. β 74. D r[1] im Strophencitat स्तृणाति st. स्तृणोति । D Bh$^{\alpha}$ वीर॰ st. वैरि॰ ॥ — १९५) D Bh$^{\alpha}$ कृत्ताः st. कृष्टाः । Bü निर्मूलं नाराचांस्तांस्तथा॰, Bh$^{\alpha}$ निर्मूलं तनारब्धास्तथा॰, D निर्मूलं तेनारब्धास्तथा॰ ॥

न निर्भुजति यस्य भ्रूः कोपेनाप्यरिमण्डले ॥ १९६ ॥
सुखयत्यर्थिनः सर्वानीप्सितार्थोपपादनात् ।
तदाशिषां प्रभावेन सततं यः सुखायते ॥ १९७ ॥
स निशामयते मन्त्रं दुर्लक्ष्यमपरैर्नरैः ।
निशाम्यन्ति वचस्तस्य मन्त्रिणो विस्मयाकुलाः ॥ १९८ ॥
रुणद्धि विद्विषां दुर्गं दुर्गतोद्धरणैकधीः ।
ऐक्ष्वाकं रामभद्रस्य यो धर्ममनुरुध्यते ॥ १९९ ॥
यो घोरं घातयत्यंहो महादानैर्महीपतिः ।
महेषुभिश्च शत्रूणां हन्ति हास्तिकमाहवे ॥ २०० ॥
न तथा तुष्यति क्षोणीं जित्वाप्युदधिमेखलाम् ।
एकं सुभाषितं श्रुत्वा यथा तूषति स प्रभुः ॥ २०१ ॥
आवते प्रत्यहं यस्य सूर्यः पूजाजिघृक्षया ।
आवेति भक्तियुक्तस्य भवो ऽपि भगवान्विभुः ॥ २०२ ॥
उदञ्चति धनुर्यावत्संग्रामे रामविक्रमः ।
तावत्तस्य विपक्षाणां न्यञ्चयन्ति शिरांसि च ॥ २०३ ॥
विलीनयति संस्पृष्टं नवनीतं यथोष्मणा ।
विलालयति चित्तं च तथा स्त्रीणां यदीक्षणात् ॥ २०४ ॥

---

१९६) cfr. β 261. Bü °पहतद्विषां, s. α 141, α 251. ॥ — १९७) cfr. β 59. —१९८) Bü दुर्लक्ष° ॥ — १९९) cfr. β 255. Bü D ऐक्षुकं, Bh[α] एक्षुकं, r एक्षुकं इक्ष्वाकुवंशोद्भवं, r[1] nur इक्ष्वाकुकुलसंभवे ॥ — २०१) cfr. β 148. Bh[α] तुष्यति, D तुषति, r[1] तुष्ट तुष्टौ st. तूषति ॥ — २०२) cfr. β 190. r आवते । त विश्रंसने । आङ्पूर्वः । भ्वादावात्मनेपदी, s. Anm. | D नित्यं st. यस्य । D Bh[α] प्रजा° st. पूजा° । D आवते भक्ति° ॥ — २०३) cfr. β 123. — २०४) cfr. β 188. D विलाययति, Bh[α] विलीनयति st. विलालयति, r schreibt विलालयति, seine Erkl. würde aber ebenso gut auf विलाययति passen, s. Anm. ॥

मुखं कृषति शालेयमिक्षुक्षेत्रं च कर्षति ।
यत्प्रसादादविज्ञातक्लेशो जनपदः सदा ॥ २०५ ॥
यस्योपद्रवादरयश्छर्दयन्ति स्वमण्डलम् ।
छर्दन्ति राज्यचिह्नानि कोशं दुर्गं च दुर्गताः ॥ २०६ ॥
नाहिर्दंशयते कंचित्तद्देशे गरुडाज्ञया ।
यदि प्रमादाद्दशति तस्मै न क्रमते विषम् ॥ २०७ ॥
नोध्रस्नाति नरः कश्चित्सुभिक्षे तस्य मण्डले ।
परमुध्रसयन्त्येके ये भिक्षाव्रतचारिणः ॥ २०८ ॥
आप्यायते यथा चन्द्रः शुक्लपक्षे विवस्वता ।
धर्मेणाप्यायते तद्वद्यो धर्मविजयी नृपः ॥ २०९ ॥
अङ्कते वृषयुग्मं यः पुण्यतीर्थेषु शक्तिभिः ।
अङ्कयत्यरिचक्रं च युद्धे पृष्ठेषु सायकैः ॥ २१० ॥
न तर्जति रुषा कंचिन्नीचमप्युपकारिणम् ।
परं तर्जयते दुष्टान्सामन्तान्संगतान्मिथः ॥ २११ ॥
न निर्भर्त्सति मात्सर्यात्कंचिदप्यनुजीविनम् ।

---

२०५) = β 184. — २०६) Bü स्वमंगलं, D स्वमंडले । Bh^α D राज° । Bü दुर्ज्जनाः ॥ — २०७) cfr. β 207. Bh^α दशयते । Bh^α तस्मै विक्रमते । D तदा st. विषम् ॥ — २०८) cfr. β 163. Bh^α नैवोद्धस्नाति यः कश्चित्सुभिक्षे यस्य मंडलं । D न चोद्ध्रस्नाति यः कश्चित्सुभिक्षे यस्य । Bh^α परमुद्धसयंत्येके D परमुद्ध्रसयंत्येके । r[1] im Strophencitat न चोद्ध्रस्नाति, erkl. ध्रमूध्र उंछे श्रयादौ … ध्रसत् उंछे ऽदंत इति …, s. Anm. ॥ — २०९) cfr. β 135. — २१०) cfr. β 160. Bü च st. यः । D पुष्पती° । Bü शक्तिषु । D Bh^α °रिसैन्यं च । Bü युद्ध । Bü Bh^α पृष्टेषु, D पृष्टिषु ॥ — २११) cfr. β 258. r[1] könnte ursprünglich die folgende Strophe vor dieser gelesen haben. D °चमप्यपका° । D समंतान्, Bh^α समंतात् ॥

अपि दुष्कृतकर्माणं न निर्भर्त्सयते द्विजम् ॥ २१२ ॥
उपश्लोकयति श्लाघ्यैः सूक्तैर्यः सूर्यमन्वहम् ।
श्लोकन्ते लोकपालाश्च यस्य लोकोत्तरान्गुणान् ॥ २१३ ॥
यथा प्रकाशते व्योम्नि चन्द्रः संपूर्णमण्डलः ।
तथा प्रकाश्यते भूमौ यः प्रजालोचनोत्सवः ॥ २१४ ॥
यो भुजाभ्यां भुवो भारं भरते भरतोपमः ।
बिभर्ति च यशोराशिं भूयांसं यस्य भूरपि ॥ २१५ ॥
शक्नोति शक्रमप्याजौ विजेतुं भुजविक्रमात् ।
शक्यते प्राणिमात्रस्य दुरुक्तं न्यायवेदिनः ॥ २१६ ॥
यो ऽर्थिनामर्थसिद्ध्यर्थं कल्पते कल्पवृक्षवत् ।
न च कल्पयति द्रव्यं गौणं मुख्यस्य संभवे ॥ २१७ ॥
यो न कुप्यति कस्मैचित्पीयूषहृदयो नृपः ।
यस्मै कोपयति क्षौणं तत्क्षणात्तस्य जीवितम् ॥ २१८ ॥
नाखेटति महाटव्यां मृगाननपराधिनः ।
आखेटयति दुष्टान्यः सामन्तानन्तराश्रयान् ॥ २१९ ॥
घोरयन्ति सुखं सुप्ता यत्प्रजा निशि निर्भयाः ।
क्रीडापारापता यासां घुरन्ति सुरतोत्सवे ॥ २२० ॥

---

२१२) cfr. β 251. r[1] s. vor. Str. Bh^α माधुर्यात्कांचि° । D निभर्त्सयति ॥ — २१३) D Bh^α स्लाघ्यैः स्तवैर्यः ॥ — २१४) cfr. β 152. Bü r beide Wurzeln mit स् । D चंद्रो व्योम्नि । Bh^α तथा प्रकाशते । Bü °लोकनो° ॥ — २१५) = β 127. Bh^α भारं राजते ॥ — २१६) cfr. β 63. D Bh^α शत्रुमप्याजौ । D Bh^α शक्नति, was r[1] gelesen hat, ist nicht festzustellen ॥ — २१७) cfr. β 83. D गौण । Bü संभवं ॥ — २१८) cfr. β 158. D पेयूष° । Bh^α कोपायति । D Bh^α नाक्षीणां st. तत्क्षणात् ॥ — २१९) cfr. β 155.

एकेनैव शरेणैकं सूदते करिणं रणे ।
अभिसूदयति सप्त पङ्क्तिस्थान्पुरुषानपि ॥ २२१ ॥
लुण्टन्ति परराष्ट्रेषु यथेष्टं यस्य सैनिकाः ।
लुण्टयन्ति न विप्राणां बालस्त्रीलिङ्गिनां धनम् ॥ २२२ ॥
यथा गदयति स्निग्धं घर्मान्ते घनमण्डलम् ।
तथा गदति गम्भीरं मधुरेण स्वरेण यः ॥ २२३ ॥
स्तेपन्ते यस्य वक्त्रेन्दोर्लावण्यामृतबिन्दवः ।
यं वीक्ष्य तेपते स्त्रीणां स्वेदाम्भः सततं तनोः ॥ २२४ ॥
ददते यो धनं भूरि ब्राह्मणेभ्यो दिने दिने ।
ददते ब्राह्मणास्तस्मै संतुष्टा नित्यमाशिषः ॥ २२५ ॥
दधते धीरधीर्धर्मे सततं हृदयेन यः ।
दधते च नृपास्तस्य शासनं शिरसानताः ॥ २२६ ॥
स्वप्ने ऽपि नानृतां वाणीं संगृणाति महीपतिः ।
यस्य संगिरते किंचित्तस्मै तत्प्रतिपादयेत् ॥ २२७ ॥
अर्थयन्ते द्विजन्मानो यस्मादर्थं यियक्षवः ।

---

२२१) cfr. β 259. D शरेणैकवारणं सूदते रणे, Bh$^{\alpha}$ सूदते वारणे रणे। अभि ist Konjektur, Bü D अपि, Bh$^{\alpha}$ अयि, Bü D सूदयते, [Bh$^{\alpha}$ सूदयति, so schreibt und erklärt auch r, r[1] षूदंग् आश्रयणे चुरादौ हिंसकीत्यर्थः] ॥ — २२२) cfr. β 46. D यथेच्छं। Bh$^{\alpha}$ लुंठयंति, r[1] लुटण् स्तेये चुरादौ। Bh$^{\alpha}$ बाला°। Bü °लिंगिनीं ॥ — २२३) cfr. β 268. Bü मेघमंडलं ॥ — २२४) cfr. β 166. D Bh$^{\alpha}$ वोच्य स्तेपते ॥ — २२५) cfr. β 177. Bh$^{\alpha}$ ददाति यो। D भूरि याचकेभ्यो। D ददते याचकास्तस्मै ॥ — २२६) cfr. β 176. Bü दधते धीधर्म्मे. Bh$^{\alpha}$ धीरधीधर्मं सजने हृदयं न य। D तस्याः। D Bh$^{\alpha}$ निदेशं st. शासनं ॥ — २२७) cfr. β 260. D Bh$^{\alpha}$ स भूपतिः st. महीपतिः। D यस्य संगिरते कंचि°। Bü तस्मै तत्तत्प्रदापयेत् ॥

अर्थापयति यः सम्यग्दुर्बोधं वैदिकं वचः ॥ २२८ ॥
भासते भास्कर इव प्रतापातिशयेन यः ।
भासयत्यधिकं लक्ष्म्या पुरंदर इवापरः ॥ २२९ ॥
मानः संकुचति स्त्रीणां यच्चिन्ताकुलचेतसाम् ।
उत्कोचति कुचाभोगं निर्भरं हृदये स्मरः ॥ २३० ॥
मृगेन्द्रमिव यं दृष्ट्वा संकुटन्ति द्विषद्भटाः ।
यः कुट्टयति तत्कुम्भिकटान्कुन्तैर्नखैरिव ॥ २३१ ॥
कोटीनां पणते नित्यं यस्य राष्ट्रे वणिग्जनः ।
यक्षा अपि पणायन्ते यद्विभूतिं गृहे गृहे ॥ २३२ ॥
सर्वो ऽभिलषति श्रीमानिन्द्रियार्थोपसेवनम् ।
अभिलष्यत्यसौ योगी तेभ्य एव निवर्तनम् ॥ २३३ ॥
निरूपयति यः सम्यग्वेदार्थमुपपत्तिभिः ।
निरूपति प्रमाणज्ञो न क्वचिद्वाक्यसंशये ॥ २३४ ॥
विरहन्ति पुरीं दूरे यदवस्कन्दभेषिताः ।
शत्रवस्त्रासलोलाक्षीः स्त्रियो विरहयन्ति च ॥ २३५ ॥
वञ्चन्ति यद्गुणा दिक्षु शरच्चन्द्रांशुनिर्मलाः ।

---

२२८) cfr. β 266. D r[1] im Strophencitat अर्थयंति, [r[1] schreibt d. Wurzel अर्थणि] ॥ — २३०) cfr. β 140. D Bh[α] r[1] im Strophencitat मानसं, Erkl. in r[1] indifferent । Bh[α] तच्चिंता° । Bü निर्भरे, D Bh[α] निर्भयं ॥ — २३१) cfr. β 236. Bh[α] द्विषद्भटाः । Bh[α] lässt die zweite Halbstrophe aus । D कुंटयति । Bü °कुंभं st. °कुम्भि° । D °कूटान् st. कटान् । Bü कुंभि° st. कुन्ती° ॥ — २३२) Bü मित्यं । Bh[α] यचाश्वपि ॥ — २३३) cfr. β 227. Bü °सेविनः, [r[1] erkl. mit विषयसेवायां] ॥ — २३४) fehlt in D Bh[α] r[1]. — २३५) cfr. β 264. D Bh[α] पुरं । Bü °भेषिताः, D Bh[α] °भेदिताः । D °लोलाषाः । Bh[α] °लोलाच्च स्त्रिया । D निरहयंति, [r विपूर्वः], r[1] schweigt ॥

वञ्चयन्ते चकोरांश्च ज्योत्स्नापानकृतोद्यमान् ॥ २३६ ॥
यं परिक्षिप्य लक्षाणि पदयन्ते पदातयः ।
कथं संपद्यते तस्य जयलक्ष्मीर्न संयुगे ॥ २३७ ॥
पथयन्ति वणिक्सार्थाः पारिपन्थिकनिर्भयाः ।
पथन्ति पथिकाः सौख्यं सुभिक्षे यस्य मण्डले ॥ २३८ ॥
ब्राह्मणान्दक्षिणीयान्यः स्वयं चर्चति चन्दनैः ।
चर्चयत्यखिलान्देवान्सदाचारपरायणः ॥ २३९ ॥
अन्तर्वेद्यामसौ विद्वान्न म्लेच्छयति केनचित् ।
न च म्लेच्छति विद्वद्भिर्वादमार्गे व्यवस्थितः ॥ २४० ॥
आचोटयन्ति चञ्चूभिराचुटन्ति नखैस्त्वचम् ।
यत्कृपाणनिकृत्तानां द्विषतां गृध्रपङ्क्तयः ॥ २४१ ॥
संयच्छति हृषीकाणि विषयानित्यभावनात् ।
यः संयमयति क्षिप्रं क्षितीशानुत्पथस्थितान् ॥ २४२ ॥
लभते यो विपक्षेभ्यो जयलक्ष्मीं महाहवे ।
लाभयन्ति नृपास्ताश्च यतो मृत्वा वरस्त्रियः ॥ २४३ ॥
स भाजयति नात्मीयान्बन्धूनात्मसमीकृतान् ।

---

२३६) cfr. β 182. Bh$^{\alpha}$ दिक्षु प्रख्याताश्च सुनिर्मलाः, D ebenso, nur °ताश्चा । Bh$^{\alpha}$ वंचयंति ॥ — २३७) cfr. β 209. D यस्य st. तस्य ॥ — २३८) cfr. β 239. D Bh$^{\alpha}$ r^{1} पंथयंति, Näheres s. Anm. । D पथिकाः पथंति सैन्यं सुभिक्षं, [Bü Bh$^{\alpha}$ r सुभिक्षे] । Bh$^{\alpha}$ सौख्यं ॥ — २३९) cfr. β 138. D दीक्षिणी°, Bh$^{\alpha}$ दक्षणी° । Bü स्वयमर्च्चति sec. m. verb. zu स्वयं चर्च्चति ॥ — २४०) cfr. β 199. Bü अंतर्विद्या° । D Bh$^{\alpha}$ वटमार्गेष्वव° ॥ — २४१) cfr. β 231 und α 246. D चंचूभिरा-चोटति । D त्वचः । D Bh$^{\alpha}$ विद्विषां st. द्विषतां ॥ — २४२) cfr. β 218. D °भा-वतः ॥ — २४३) cfr. β 210. Bü लोभयंति । D लाभयंति विपक्षास्तमतो मृत्वा रिपुस्त्रियः, Bh$^{\alpha}$ लाभयंति विपक्षास्तान्ततो मृत्वा सुरस्त्रियः ॥

सभाजयति वाक्यैस्तु सूनृतैर्विभवैरपि ॥ २४४ ॥
पर्यवस्यति सर्वत्र जयश्रीर्यस्य संयुगे ।
कांदिशीभूय शत्रूणां गणः पर्यवसायति ॥ २४५ ॥
यत्रासौ क्षत्रियः कंचिद्वीक्षते वस्तुवाहनम् ।
तस्योत्त्रुटति तत्सर्वमुत्त्रोटयति वा शिरः ॥ २४६ ॥
न रुजन्ति जराव्याधिदोषास्तस्य तपोनिधेः ।
तत्प्रभावात्प्रजानां च रोजयन्ति न केचन ॥ २४७ ॥
यस्य च्योतति लावण्यं मुखाच्चन्द्रादिवामृतम् ।
ज्योत्स्नाजालमिव स्वच्छाः श्चोतन्ति दशनांशवः ॥ २४८ ॥
यो गुम्फति पदैः श्लोकान्वल्गुभिः फल्गुवर्जितैः ।
गाथां गुफति गम्भीरां प्रसन्नार्थां मनोहराम् ॥ २४९ ॥
हृदयं दलति स्त्रीणां यद्वियोगेन तत्क्षणात् ।
दालयत्यनिशं यश्च मरिचान्यरिमस्तके ॥ २५० ॥
यस्याज्ञां काश्यपीपृष्ठे लोठते नापरो भटः ।
लुठन्ति पादपीठे च प्रतापोपनता नृपाः ॥ २५१ ॥

---

२४४) cfr. α 154, β 267. r kennt für die zweite Halbstrophe nur die Auffassung स भाजयति, r[1] giebt beide Möglichkeiten ॥ — २४५) D संगरे st. संयुगे ॥ — २४६) cfr. α 241 und β 231. D किंचि° । Bü वोच्यते । Bh[α] बभ्रुवाहनं । Bh[α] °त्त्रटति ॥ — २४७) cfr. β 198. D Bh[α] °रोगा° st. °दोषा° । Bü °वात्पूजानां ॥ — २४८) D यस्योच्योतति, r[1] im Strophencitat यस्योच्योतति, Erkl. in r[1] für Präpos. indifferent । Bü स्वच्छाश्चोतंति, D स्वच्छाश्च्योतंति ॥ — २४९) D फलवर्ज्जितैः । Bü Bh[α] D गाथां गुंफति, r गुंफति गुफति । गुफ गुंफ दृभी ग्रंथे एतौ .., r[1] im Strophencitat यो गुंफति, erkl. nur गुफ गुंफत् ग्रंथने . . . द्वौ धातू . . । Bh[α] प्रसन्नार्थमनोहरां ॥ — २५०) Bh[α] यश्च यः खड्गेनारि°, D यश्च नरिचानरिमस्तकं ॥ — २५१) Bü यस्याज्ञा काश्यपीपोठे । D लोटते ॥

पिण्डते पितृपिण्डार्थं यो हवींषि दिने दिने ।
को हि पिण्डयति तस्य गुणाग्गणितपण्डितः ॥ २५२ ॥
नटन्ति पुरतो यस्य नाटकज्ञा नटस्त्रियः ।
नाटयन्ति यथान्यायं यासां भूचक्षुरादयः ॥ २५३ ॥
आस्कन्दति परिस्कन्दानिवाभ्यर्णानसौ नृपान् ।
आस्कन्दयति दूरस्थानवस्कन्देन वाजिभिः ॥ २५४ ॥
लजते लाजिनीनां तु नाम श्रुत्वापि श्रोत्रियः ।
लज्जते पण्यनारीणां कथाभिश्च जितेन्द्रियः ॥ २५५ ॥
प्रोञ्छति ज्ञानदर्पं यो वाक्प्रवाहेण वादिनाम् ।
खड्गधारासहायश्च यशः प्रोञ्छति विद्विषाम् ॥ २५६ ॥
पृच्छति प्रणतो भूत्वा यो विप्रान्धर्मसंशयम् ।
अपि प्रच्छयति शस्त्रेण दर्पं दुष्टव्रणं द्विषाम् ॥ २५७ ॥
पल्पूलयति यः सेनां विद्विषां दुर्गलङ्घने ।
हस्तावापविधौ बाणान्यः पूलयति पाणिना ॥ २५८ ॥

---

२५२) D पितृदंडार्थं । Bü D Bh$^{\alpha}$ पिंडयते; r पिंडयति, erkl. पिडि .. चुरादौ; r[1] पिंडुम्, direkte Bemerkung über Genus fehlt; s. Anm. ॥ — २५३) cfr. β 180. D Bh$^{\alpha}$ नाट्यविद्या ॥ — २५४) Bü °भ्यवर्णनसौ । Bh$^{\alpha}$ D परिस्कंदाग्पार्ष्णिग्राहानसौ, cfr. r परिस्कंदानिव पार्ष्णिग्राहानिव । Bh$^{\alpha}$ चा-स्कंदति यति स्थानं वस्कंदेन च वाजिनः । D वाजिनः । Bü über °स्कंदेव [oder °च] ist न geschr. ॥ — २५५) cfr. β 205. D लज्जते, Bü Bh$^{\alpha}$ लजति, r लजति लज भर्त्सने भ्वादौ परस्मैपदी, r[1] लस्ज भर्जने भ्वादौ st. konjic. लजते । Bh$^{\alpha}$ नु । Bh$^{\alpha}$ पुण्य° ॥ — २५६) cfr. β 162. Bü प्रोच्छंति, Bh$^{\alpha}$ प्रोछति । D °धारावशावस्य यशः, Bh$^{\alpha}$ °धारावशावस्य शिरः प्रोछति च द्विषां । r[1] nur: उछ ? उच्च यः उच्छिनोतीत्यर्थः [wohl उच्चिनो°] उछेत् निवासे तुदादौ ॥ — २५७) Bh$^{\alpha}$ दुष्टव्रणा, D दुष्टव्रतं ॥ — २५८) Bh$^{\alpha}$ पल्पूल°, Bü पल्पू° oder पल्पू°, D पल्प° oder पल्प°, r[1] पल्पु° oder पल्पु°, r erwähnt, dass man ल und प

यः प्रोषति रणे शत्रूञ्छक्रतुल्यपराक्रमः ।
अपि मुष्यति तन्नारीहृदयं विरहाग्निना ॥ २५९ ॥
लुम्पति प्रतिपक्षाणां लक्ष्मीं यो बाणवृष्टिभिः ।
न लुप्यति मतिर्यस्य सकले ऽप्यर्थसंशये ॥ २६० ॥
लञ्छति स्वच्छरूपस्य चन्द्रस्य हृदयं मृगः ।
न लाञ्छति यशो यस्य त्रिषु लोकेषु कश्चन ॥ २६१ ॥
यां यां स्पृशति हस्तेन स नारीं नरनायकः ।
सा सा पर्षति सर्वाङ्गं गर्गरीव नवोदकम् ॥ २६२ ॥
यस्योर्जति गजानीकमूर्जयन्ति च वाजिनः ।
यथेष्टं पराराष्ट्रेषु चरन्तः सस्यशाकटम् ॥ २६३ ॥
शब्दयन्ति तदास्थाने ऽपृष्टाः के ऽपि न किंचन ।
एकः शब्दायते द्वाःस्थः सेवकानुपदर्शयन् ॥ २६४ ॥
एटन्ति यस्य सैन्यानि यत्र देशे महौजसः ।
केटन्ति प्रतिपक्षाश्च प्रतीपं तत्र तत्क्षणात् ॥ २६५ ॥
दोर्भ्यां यो विद्विषां दर्पं भञ्जयत्याञ्जनेयवत् ।

---

schreiben könne, s. Anm. । D Bh$^{\alpha}$ यत्तेन, Bü यत्सेनां st. konjic. यः सेनां । D हत्वापाप°, Bh$^{\alpha}$ हस्त्वापाय° । Bü °वियौ । D पूरयति ॥

२५९) cfr. β 266. D यः श्रोष्यति, Bh$^{\alpha}$ यः प्रोषति । D Bh$^{\alpha}$ शत्रुं । D Bh$^{\alpha}$ चाथ st. अपि ॥ — २६०) cfr. β 175. — २६१) D लंछति, Bh$^{\alpha}$ लुंछति st. लच्छति । Bü न लुंछति । r[1] लकु लावु लचणे भ्वादौ ॥ — २६२) D वर्षति, Bh$^{\alpha}$ स्पृशति st. पर्षति ॥ — २६३) cfr. β 217. r[1] und einmal r शस्य°, Bh$^{\alpha}$ शस्य°, Bü und einmal r सस्य° aus शस्य° verbessert ॥ — २६४) cfr. β 186. D Bh$^{\alpha}$ °स्थाने न पृष्टाः केपि किंचन । Bh$^{\alpha}$ द्वाःस्थ ॥ — २६५) D पटंति, Bü r für ए und प dasselbe Zeichen, r scheint एटन्ति zu erklären । D कटंति st. केटन्ति । D प्रतीपं तमअंजनात्, Bh$^{\alpha}$ प्रतीपं तद्भर्जनात् ॥

भनक्ति भामिनीनां च दृष्ट्या मानमनङ्गवत् ॥ २६६ ॥
न जहाति सदाचारं स सदा चारणस्तुतः ।
उज्जिहीते जगज्जित्वा यस्य कीर्तिः सुरालयम् ॥ २६७ ॥
यो मुण्डति क्षुरप्रेण रिपूणां मस्तकं रणे ।
धनुर्वेदकृताभ्यासादपि मुण्डयति भुवौ ॥ २६८ ॥
ईट्टे त्रिविष्टपास्थाने यत्कीर्तिं वासवः स्वयम् ।
ईडयन्ति नरेन्द्राश्च भूमावुद्भूतविस्मयाः ॥ २६९ ॥
यो जित्वा भुजवीर्येण पाशयत्यवनीपतीन् ।
विपाशयति चात्मानं सततं ब्रह्मभावनात् ॥ २७० ॥
सर्वः प्रमाद्यति प्रायः शौर्यदर्पेण भूपतिः ।
शूरो ऽपि नीतिमान्यो ऽसौ न प्रमादयति क्वचित् ॥ २७१ ॥
आक्रामति जगत्सर्वं यः शक्र इव तेजसा ।
आक्राम्यति मनः सम्यक्संचरद्विषमेषु यः ॥ २७२ ॥
न क्लाम्यति दिनं कृत्स्नं ददानो ऽपि धनं बहु ।
न च क्लामति संग्रामे निघ्नन्गजघटाशतम् ॥ २७३ ॥
न त्रस्यति रणे क्रुद्धाद्यमाद्दण्डधरादपि ।

---

२६६) cfr. β 133. D मानिनीनां । D Bhα दृष्ट्वा । Bü Bhα मानं मतंगवत् ॥ — २६७) cfr. β 262. D Bhα यः st. स । D सदाचरणः स्तुतः, Bü सदाचरणप्रियः cfr. β 176 ॥ — २६८) Bhα मुंडति यः, D मुंडते यः । Bü °वेदाकृता°, Bhα °वेदकथाभ्या° ॥ — २६९) cfr. β 159. Bü त्रिविष्टपस्थाने। D भूमावद्भुत° ॥ — २७०) cfr. β 232. Bü पासश्रय° । Bü विपासय° ॥ — २७१) cfr. β 245. D Bhα यश्च st. यो ऽसौ ॥ — २७२) cfr. β 189. Bhα D जगत्कृत्स्नं । D यो भूपः शक्रतेजसा । Bhα आक्रम्यति । Bhα संचयद्विषयेषु, D संचरद्विपयेषु ॥ — २७३) cfr. β 228. Bhα ति statt पि । Bü संग्रामेनिसंग्रामेतिघ्नन् ॥

परं चसति धर्मज्ञो यः सन्मार्गविलङ्घनात् ॥ २७४ ॥
क्षोणीमण्डलमक्ष्णोति तस्य कीर्तिर्न केवलम् ।
अक्षति क्षतनिःशेषक्षत्रियस्य जगत्त्रयम् ॥ २७५ ॥
वातेनोपहतं यद्वत्कंपते कदलीवनम् ।
कम्पते रिपुसैन्यं च यत्प्रतापहतं तथा ॥ २७६ ॥
गेषते दक्षिणीयानि यः पात्राणि प्रयत्नतः ।
गवेषयति भूयांसि तेभ्यो दातुं वसूनि च ॥ २७७ ॥
निंस्ते दन्तच्छदं स्त्रीणां यत्प्रजा निरुपद्रवा ।
स्तनकण्ठकपोलोरुकक्षचक्षुश्च निक्षति ॥ २७८ ॥
विरोचन इव श्रीमान्यो रोचयति तेजसा ।
रोचते सर्वलोकेभ्यश्चारुचारित्रभूषणः ॥ २७९ ॥
न ध्वांक्षति नरः कश्चिदसभ्यं तस्य मण्डले ।
न ध्रांक्षति परद्रव्यं सर्वो ऽप्यर्थेन सुस्थितः ॥ २८० ॥
सिंहं दृष्ट्वा पलायन्ते यथा चस्ता मृगादयः ।
तथा पलन्ति सर्वासु दिक्षु यं वीक्ष्य शत्रवः ॥ २८१ ॥
लपति स्निग्धया वाचा सर्वैः परिचितैः सह ।

---

२७४) cfr. β 106. Bh^α रया । Bü परिचसति [r चसति, nicht परि°; r[1] nicht zu entscheiden] ॥ — २७५) Bh^α चोणि° । D °मच्णाति ॥ — २७६) Bh^α कंपते, D कापते st. कंपते । Bh^α om. च । Bh^α °तापहननं, Bü °तापापहतं ॥ — २७७) cfr. β 249. D दीचणीयानि, Bh^α दचणीयानि ॥ — २७८) cfr. β 201. Bü Bh^α D °द्रवाः । D °दवचचचुच, Bh^α °दर्वचचचुच, Bü °दकचर्णोचचुच, कच ist Konj., cfr. β. ॥ — २७९) Bü °चारित्रभू° । Bh^α °भूषणं ॥ — २८०) cfr. β 164. Bü कश्चिदसत्यं । D Bh^α ध्वांचति st. ध्रांचति ॥ — २८१) cfr. β 261.

सकृद्दृष्टमपि प्रायः साह्लादं ह्लापयत्यसौ ॥ २८२ ॥
प्रयाणयति रोषेण यत्रासौ शत्रुमण्डले ।
पेणन्ति तत्र राजानः प्रतीपं त्रस्तचेतसः ॥ २८३ ॥
असौ स्वश्लाघमानोऽपि कत्थते नात्मनो गुणान् ।
कथयन्ति जना एव तस्य तानद्भुतान्भुवि ॥ २८४ ॥
द्राघते वपुरत्यर्थं द्राहते रजनीषु च ।
यत्खण्डितानां नारीणां चिन्ताचलितचेतसाम् ॥ २८५ ॥
नमति ब्राह्मणान्नित्यमादित्यांश्च नमस्यति ।
ऋध्नोति धीः सदा यस्य ऋध्यति श्रीश्च भूतले ॥ २८६ ॥
लिनाति धर्म एवासौ नेन्द्रियार्थेषु लीयते ।
रणे शूरयते नित्यं शूर्यते विद्विषां बलम् ॥ २८७ ॥
दिवा निद्रायते नासौ न निद्रायति संध्ययोः ।
आत्मानं ध्यायति ब्रह्म ध्रायत्यमृतपूर्णवत् ॥ २८८ ॥
यः स्तौति भास्करं भक्त्या नौति पापहरं हरम् ।
संदर्भति महाकाव्यं संदर्भयति नाटकम् ॥ २८९ ॥
एजते तेजसा यश्च यत्नाम्ना जगदेजति ।

---

२८२) cfr. β 196. Bh^α सर्वः परिचितैस्सह । D सापय° । Bü ह्लापय° aus ह्लादय° verbessert ॥ — २८३) Bh^α D पेणंति । Bü प्रताप, Bh^α प्रतियं st. प्रतीपं ॥ — २८४) cfr. β 229. Bh^α कथते । Bü गुणान् st. भुवि ॥ — २८५) cfr. β 109. Bü यः खंडि°, r[1] erkl. शरीरमासयति, soll viell. °मायासयति, nicht °मायस्यति sein ॥ — २८६) cfr. β 255 und β 248. D Bh^α ऋध्नाति । Bh^α श्रीश्च सर्वदा ॥ — २८७) cfr. β 262 und β 246. Bü शूरयते, शूर्यते । Bh^α द्विषतां बलं ॥ — २८८) cfr. β 256. Bh^α आत्मानं धाव्यते । D ब्रह्म ध्याय° । Bh^α D °पूर्त्तवत् ॥ — २८९) cfr. β 43.

धनैर्दक्षयते विप्रान्दक्षते लिङ्गिनो ऽपि यः ॥ २९० ॥
यो मृडत्याश्रितान्सर्वान्मृड्णाति शरणागतान् ।
पीडयत्यरिभूपालान्न पीडयति तत्प्रजाः ॥ २९१ ॥
यस्मै रुष्यति तस्यासौ कुलमेवाभिरोषति ।
निश्चाययति द्विजैः सार्धं यो धर्मं निश्चिनोति च ॥ २९२ ॥
शत्रवस्तस्य जायन्ति जगत्पूज्यः स जायते ।
सर्वस्य भाषते भद्रं न कंचिद्भषते नरम् ॥ २९३ ॥
यः पुरश्चोरयत्यर्थं चूर्यते तं स तत्क्षणात् ।
उन्मूलयति संमोहमुन्मूलति च विद्विषः ॥ २९४ ॥
अधर्माद्भेषते नित्यं भ्लेषते नात्मनः स्थितेः ।
अस्यति क्षेपणीयांश्च नायस्यति च यद्वपुः ॥ २९५ ॥
उच्चुटन्त्यरयो यस्य द्रोहादुच्चाटयन्ति च ।
यो मण्डयति साम्राज्यमाभिजात्यं च मण्डति ॥ २९६ ॥
खण्डते वादिनां दर्पं मुण्डं खण्डयति द्विषाम् ।

---

२९०) cfr. β 271 und β 269. D यस्य नाम्ना च अ°, Bü यस्य नाम्नापि अ° । D दक्षति प्राज्ञवाक्येषु st. ध° — विप्रान् । ob r[1] °यते oder °यति will, kann ich nicht feststellen ॥ — २९१) cfr. β 273 und 253. D मृडय° st. यो मृड° । D मृड्णाति, Bh[α] मृडाति, Bü मृड्णाति, so erkl. auch r r[1] । D °पालांश्च पीडति ॥ — २९२) cfr. β 86. — २९३) cfr. β 263 und β 190. Bü किंचि°, Bh[α] कंचि° aus किंचि° verbessert ॥ — २९४) cfr. β 253. Bh[α] D पुनश्चो° । Bh[α] D उन्मूलयति st. उन्मूलति च; r[1] sagt, der ihm vorliegende Komm. erkläre zwar उन्मूलति, das Metrum gebiete aber उन्मूलयति; s. Anm. ॥ — २९५) cfr. β 121. D भषते st. भेषते । r भ्रेषते भ्रेषृ, Bh[α] D भेषते, diese Form scheint auch r[1] zu erkl., st. भ्लेषते । Bh[α] स्यति । Bh[α] यस्यति चेपणीयाश्च । D मायस्यति च, Bü नानायस्यति यद्वपुः ॥ — २९६) cfr. β 252. Bh[α] उच्चुटंत्य°, r schreibt उच्चुटंति, r und r[1] erkl. aber उच्चुटन्ति, s. α 246 । Bh[α] द्रोहा उ°, D द्रोह उ° ॥

भूषयन्ति गुणाः सर्वे यो गुणानेव भूषति ॥ २९७ ॥
अनुकूलति यो धर्ममनुकूलयति द्विजान् ।
इन्द्धे यस्य मतिर्नित्यमेधते श्रीश्च सर्वदा ॥ २९८ ॥
इति समाप्तमवाप्तगुणोदयं
कविरहस्यमिदं रसिकप्रियम् ।
सदभिधानहलायुधसंज्ञक-
द्विजवरस्य कृतिः सुकृतात्मनः ॥ २९९ ॥

---

२९७) cfr. β 265 und β 252. — २९८) cfr. β 271. r अनुकूलयते; r[1] erwähnt die Form selbst nicht, die Erkl. in r r[1] schweigen über das Genus, s. Anm. ॥ — २९९) Drutavilambita. cfr. β 274. Nur in D. D समाप्तसदाप्त° । Ich gebe im 3. pâda die Lesung von D, s. aber Einl. S. 21 ffg. ॥ Über den Schluss der Hdschr. $\frac{Bü}{r}$ s. Einl. S. 50 fg., zu Bh[a] s. ebenda Note 10); in Bh[a] schliesslich noch इति कविगुह्यनामकाव्य पूर्ण । D schliesst: इति कविरहस्यं काव्यं समाप्तं । r[1] इति कविरहस्यटीकावचूरिः ॥

β) Text der kürzeren Recension.

जयन्ति मुरजित्पादनखदीधितिदीपिकाः ।
मोहान्धकारविध्वंसान्मुक्तिमार्गप्रकाशिकाः ॥ १ ॥
लोकेषु शास्त्रेषु च ये प्रसिद्धाः काव्येषु ये सत्कविभिः प्रयुक्ताः ।
उच्चित्य तांश्चित्तविनोदनाय शब्दानहं धातुभिरुद्धरामि ॥ २ ॥
एकार्था एकशब्दाश्च नानार्थाश्चैकवाचकाः ।
सदृशार्थाभिधानाश्च भिन्नार्थाः सदृशाक्षराः ॥ ३ ॥
एकार्थास्तुल्यशब्दाश्च निबध्यन्ते ऽत्र धातवः ।
धातुपारायणाम्भोधिपारोत्तीर्णधिया मया ॥ ४ ॥

अस्त्यगस्त्यमुनिज्योत्स्नापवित्रे दक्षिणापथे ।
कृष्णराज इति ख्यातो राजा साम्राज्यदीक्षितः ॥ ५ ॥

Str. 1—5 auch in t vollständig angeführt. — १) = α 1. G महान्ध° । A °मोक्ष° st. °मुक्ति° । L T F °प्रदर्शिकाः ॥ — २) Indravajrâ. = α 3. B उच्छिद्य तां über विपश्चितां geschr., t उच्छिद्य तांस्, C A Bhβ तच्चिंत्यतां, G P उद्धृत्य तांस् st. उच्चित्य तांस् । P °विनोदहेतोः ॥ — ३) cfr. α 4. P एकार्थाश्चैक°, G एकार्थानेक° । T भिन्नार्था° st. नानार्था° । C Bhβ T F °श्चैव st. °श्चैक° । A C Bhβ नानार्थाः st. भिन्नार्थाः ॥ — ४) cfr. α 5. B °म्भोधेः ॥ — ५) = α 6. G P °गस्तिमु° । Bhβ °गम्त्यमतिज्यो° । B °मुनेर्ज्यो° ॥

गोपायति क्षितिमिमां चतुरब्धिसीमां
पापाज्जुगुप्सत उदारमतिः सदैव ।
वित्तं न गोपयति यस्तु वनीयकेभ्यो
धीरो न गुप्यति महत्यपि कार्यजाते ॥ ६ ॥
अग्निं पृणाति पृणति द्विजदेवतांश्च
प्रीणाति बान्धवजनानतिथीन्पृणोति ।
यः प्रीयते प्रणयिषु प्रयते च भृत्या-
न्यं प्रीणयन्ति कविसूक्तिरसायनानि ॥ ७ ॥
धूनोति चम्पकवनानि धुनोत्यशोकं
चूतं धुनाति धुवति स्फुटितातिमुक्तम् ।
वायुर्विधूनयति केसरपुष्परेणू-
न्यत्कानने धवति चन्दनमञ्जरीश्च ॥ ८ ॥
कायो न जीर्यति जृणाति न यस्य शक्ति-
र्नो जूर्यते भुजबलं न जिनाति तेजः ।
यद्विद्विषां जरति चेतसि भोगतृष्णा
तेषां वपूंषि विपिनेषु च जारयन्ति ॥ ९ ॥

---

६) Vasantatilakâ. cfr. *α* 7. B चतुरोब्धि° । G तु, C Bhβ v स्तु st. न B यस्तु durch Korr. [urspr. यस्त?], G यन्न, Bhβ यः स्त st. यस्तु । A, viell. auch C वनीपकेभ्यो, P वनीयकेषु ॥ — ७) Vasantatilakâ. cfr. *α* 8. B L T F t प्राययन्ति, P प्रीययन्ति st. प्रीणयन्ति, t प्रीणयन्तीति क्वचित्पाठः, vl nicht zu entscheiden । B P °सूक्त° ॥ — ८) Vasantatilakâ. = *α* 12. LTF स्फुरिता°, B °टि° aus °रि° verb. । B L T F केशर°, A Bhβ Si. Kau. [Bombay 1887, pag. 254, l. 12] चंपक° st. केसर°। B चन्द्नवञ्जरीश्च ॥ — ९) Vasantatilakâ. = *α* 14. A Bhβ G तेजसि st. चेतसि । C A Bhβ G P न st. च ॥

यस्तृप्नोति पितॄन्स्वधापरिगतैर्हव्यैश्च कव्यैः सदा
स्वाहाशब्दपरिष्कृतेन हविषा यो ऽग्निचयं तर्पति ।
देवांस्तर्पयति प्रियोपहरणैर्मन्त्रैर्नमस्कारिभि-
स्तृप्यत्यन्यनरेन्द्रदुर्लभतमैः काम्यैः प्रकामं च यः ॥ १० ॥
यो प्रीणाति जयश्रियं रणमुखे धर्मं वृणीते ऽध्वरे
तेजोभिर्जगदावृणोति वरति ज्ञातीन्यथार्हैर्धनैः ।
सत्कीर्तिं च वृणाति यो वरयति क्षेमं यशो प्रीयते
युद्धे वारयति द्विषो निवरते नित्यं प्रजोपद्रवम् ॥ ११ ॥
गाथां ग्रन्थयति प्रसन्नललितां श्लोकं च यो ग्रन्थति
श्लाघ्यं ग्राथयति स्फुटार्थमधुरं गद्यं च हृद्यं सदा ।
भावालंकृतिपेशलं ग्रथति यः श्लिष्टाक्षरं नाटकं
ग्रथ्नाति प्रथितावदातचरितः शास्त्रं विचित्रं च यः ॥ १२ ॥
यस्योद्यानवने स्फुटन्ति सततं वल्लीषु पुष्पच्छटाः
स्फोटन्ते नवकुड्मलानि कुटजप्रायेषु वृक्षेषु च ।

---

१०) Çârdûlavikrîḍita. cfr. *α* 16. A C Bh*β* G P सुधा° st. स्वधा° । P कव्यैश्च हव्यैः । P स्वाहाकारप° । T °पुरस्कृतेन । A C Bh*β* G °शब्दपविचितेन । alle ausser P प्रियोपकरणै° । B नमस्कारकै° । C °महेन्द्र° । L T F कामैः । A C Bh*β* G P °तमैः सम्यक्प्रकामैश्च यः ॥ — ११) Çârdûlavikrîḍita. cfr. *α* 18. C द्विषो हि वरते । L T F प्रियो° st. प्रजो° ॥ — १२) Çârdûlavikrîḍita. cfr. *α* 15. B P प्रकाममसलितां । B L T F P पद्यं st. हृद्यं । B ग्रथयति st. ग्रथति यः । B C A Bh*β* G P स्पष्टाक्षरं । L F T प्रतितावदाचरितकं, B प्रथितो ऽवदा° geänd. aus प्रथितावदा°, C °वदातचरतं स्तोत्रं, A Bh*β* °वदातचरित स्तोत्रं, G स्तोत्रं, F शास्त्रं । Komm. über Verbalformen s. Anm. ||

स्फोटन्ति द्विषतां शिरांसि सहसा यस्याप्रियं कुर्वतां
यश्चास्फोटयति स्फुटं दश दिशः कुर्वन्नवैः पूरिताः ॥ १३ ॥
वस्ते नेत्रवरं निवासयति यश्चित्रं च चीनांशुकं
यो वस्यत्यरिषु प्रवासयति यः क्रुद्धः कुलं विद्विषाम् ।
शश्वद्वासयति व्रजन्दश दिशः कस्तूरिकासौरभै-
र्लक्ष्मीर्यस्य मुखाम्बुजे निवसति प्रीत्या सरस्वत्यपि ॥ १४ ॥
मृषयति न नृपाणां मृष्यते नोद्धताना-
मनुचितमणुमात्रं न द्विषां मर्षते यः ।
अपि गुरुमपराधं मर्षति ब्राह्मणानां
सितवसनभृतां यो मर्षयत्यागमज्ञः ॥ १५ ॥
निशितशरसहस्रैश्छादयत्यन्तरिक्षं
छदति समरभूमिं विद्विषां रुण्डखण्डैः ।
छदयति सुरलोकं यो गुणैर्यै च युद्धे
सुरयुवतिविमुक्ताश्छादयन्ति स्रजश्च ॥ १६ ॥

---

१३) Çârdûlavikrîḍita. = *α* 22. L T F °तटे st. °वने । C A Bhβ G P पुष्पच्छदाः । B नवकुट्टलानि, L T F नवकुड्मलानि । C A Bhβ G सततं st. सहसा । P यस्य प्रियं, C A Bhβ यस्याहितं । L T F स्फुटन्दश । B कुर्वन्नरैः, L T F कुर्वंश्छरैः ॥ — १४) Çârdûlavikrîḍita. cfr. *α* 26. A G चीरांशुकं । A G °विभ्रमै°, C °विमै°, Bhβ °भिर्भ्रमै° st. °सौरभै° ॥ — १५) Mâlinî. cfr. *α* 17. P beg. मृषति च न । C A Bhβ G v stellen मृष्यते und मर्षते um [C मृषः st. मृष्यते] । alle Texte ausser B चोद्धतानां° । B ursprüngl. u. L F °मणु° st. °मगु° । C Bhβ G विद्विषां [Bhβ °षामणु°], A यद्द्विषां, B म त्विषां st. न द्विषां । C A Bhβ G च st. यः । L F T अपि शतमपराधान् । G P °भृतीर्यो । L F T °गमज्ञम् ॥ — १६) Mâlinî. cfr. *α* 73. L T F °न्तरीक्षं । L T B मुण्डखण्डैः, F खण्डमुण्डैः, A C Bhβ G P रुंडमुंडैः । Bhβ यो गणै° । A C Bhβ G P r °यन्ते । B प्रजाश्च । vl zur ganzen Strophe: छद अपवारणे परस्मैपदी

कुरति कुररवृन्दं चक्रवाकाः कुणन्ति
श्रुतिपुटपरिपेयं क्रौञ्चचक्रं कुनाति ।
क्वणति च जलरङ्कुर्मन्मथोन्मत्तकान्ता-
रतिरसरमणीयं यद्गृहोद्यानवाप्याम् ॥ १७ ॥

ईर्ते यत्कीर्तिरैन्द्रं पुरमनवरतं प्रेरयत्यन्तरात्मा
यं धर्मे प्रेरति श्रीर्विषयसुखरसास्वादनाय प्रकामम् ।
यः प्रेलत्यात्मनोंऽहः क्रतुभिरतनुभिः प्रेलयत्यस्त्रजालैः
संग्रामे शत्रुसेनां द्रविणवितरणैः पेलयत्यर्थिदौःस्थ्यम्
॥ १८ ॥

आधृषादिर्वा ह्रस्वो ऽयं घटादिपाठाद्वा, t छद अपवारणे आधृषादिरात्मनेपदी वा छपो ऽयं च ऊर्जने बले प्राणने मि उछादीर ऊर्जने घटादिपाठात् ॥

१७) Mâlinî. cfr. *α* 33 und *α* 43. C A Bhβ G P L T F कुवति । Bhβ G P L कुरव° st. कुरर°, A कुरर° verbessert aus कुरव° । T श्रुत°, [T Note श्रुति°] । L F P कुणाति, B कूणीते, कूणी für getilgtes अनीय, st. कुनाति । C A Bhβ G P कुणति st. क्वणति । L कुजनबन्धू, F सुरवहंसो, G च जलजन्तुड्, T च कलहंसो st. च जलरङ्कुड्, T erklärt, seine Lesung sei Konj. für कुजनवम्भु und कुजनबन्धू seiner Quellen । L T °चित्तानवरत°, F °चित्तोनवरत° st. °कान्तारतिरस° । Bhβ °नवाप्यां, [A °प्यां?], C °ननाप्यां । Komm.: v कुवतीति कुवतीति कु शब्दे तुदादिः..., zur 4. Verbalform कुणतीति कुण रण दंडकपठितौ भ्वादिः, t कुव शब्दे कुण शब्दोपतापयोस्तुदादिः कुञ्चि शब्दे कुञ्जिलेके स्वादिः क्र्यादिः पत्रान्तरञ्च न निबद्धं अण ... कण क्वण ... शब्दार्थाः भुवादौ, vl कुप शब्दे कुण शब्दोपतापयोस्तुदादिः कुकञ्चि शब्दे कुञ्जिलेके स्वादिः क्र्यादिः पत्रान्तरं च न निषिद्धं, die 4. Verbalform wird nicht erkl. ॥ — १८) Sragdharâ. cfr. *α* 21. Bhβ इर्त्ते । P विषयरससुखा° । B A यः प्रेरत्या°, L T F यः प्रेणत्या° । B °त्महंतुः, L T F °त्मनो ऽघं, C °त्मनोंहुः? । L T F °भिः प्रेणय° । G °सेना । B G °णैः प्रेलय°, P °णैः प्रेरय°, L T F °णैः पेणय° । P °दोष्यम्, Bhβ °दौस्थं, B स्थं von दौस्थ्यं über einer Tilgung । Komm.: t vl ईर [vl इर] गतौ कम्पने [vl कल्पने] च अदादिः ईर क्षेपे आधृषादिः, dann t ईवर स्वप्नक्षेपणयोः इन [oder इल] क्षेपाक्षेपयोस्तुदादिः इन [oder इल] प्रेरणे चुरादिः कन [oder कल] पिन [oder पिल] क्षेपे इत्यपि, und vl ईन प्रक्षेपणे गतौ च इन तापक्षेपयोस्तुदादिः इन प्रेरणे चुरादिः ॥

श्राति श्राद्धे हविरभिमतं श्रोत्रियाणां गृहेषु
श्रीणात्यन्यः स्वरुचिसदृशान्क्षीरखण्डप्रकारान् ।
अन्नं श्रायत्यनुपमरसं मूल्यमुख्यं च मांसं
राष्ट्रे यस्य श्रपयति जनः सुस्थितो हव्यकव्यम् ॥ १९ ॥

कोकूयते शिशुकमप्यतिगौरवेण
यः सर्वलोकहृदयाब्जविकाससूर्यः ।
शोकान्न कौति कुवते न भयाच्च कश्चि-
द्यन्मण्डले जनपदः कवते च सूक्तम् ॥ २० ॥

तृष्णां न पुष्णाति यशांसि पुष्यति
प्रवारणैर्विप्रमनांसि पोषति ।
भृत्यांश्च यः पोषयतीप्सितैर्धनैः
प्रतिक्षणं पूषति यस्य विक्रमः ॥ २१ ॥

शास्त्यरीन्धर्ममाशास्ते कीर्तिमाशंसते पराम् ।
यः शंसति सतां वृत्तं विशसत्युत्पथस्थितान् ॥ २२ ॥

---

१९) Mandâkrântâ. cfr. *α* 20. B L T F P श्रेष्ठं st. श्राद्धे । B °भिहितं A °न्य st. °न्यः, dahinter Tilgung । B सुरुचि° । L T F सुकविसदृ° P °शाम्बखण्डदुग्धप्रकारान् । Bhβ °प्रकाशान् । P चान्यः st. चान्नं । B मूल्यमुखं Bhβ मुख्यमुख्यं, G P शुख्यमुख्यं, F मृत्यमुख्यम्न, A मूल्यसुख्यं, C मूल्यमुखं L मूल्यमख्यम्न । B जन स्वस्तितो, तो aus त्ये ॥ — २०) Vasantatilakâ. cfr. *α* 71. C A Bhβ L T F G P °विकाश° ॥ — २१) Upajâti (Indravaṁçâ + Vaṁçastha, s. Anm.) = *α* 13; *α* तु st. च । B पुष्यति युवा धनै°, यु, eigentl. पु, über einer Tilgung, G P प्रचारणै° । C Bhβ G °तीप्सिते°, A °तीहते° ॥ — २२) cfr. *α* 46. L T F शंसते सतां वृत्तिं, auch vl hat wohl शंसते im Auge: शंसज् । A विशंस° । Komm. s. Anm. ॥

रात्रावुदयते चन्द्रो दिवोदयति भास्करः ।
उदेति यः सदोर्व्यां च नोदीयन्ते च विद्विषः ॥ २३ ॥
ददाति द्रविणं भूरि दाति दारिद्र्यमर्थिनाम् ।
यो ऽवदायति कीर्तिं च शिरो ऽवद्यति विद्विषाम् ॥ २४ ॥
वेत्ति सर्वाणि शास्त्राणि गर्वो यस्य न विद्यते ।
विन्त्ते धर्मं सदा सद्भिस्तेषु पूजां च विन्दति ॥ २५ ॥
यस्य पृथ्वी प्रसूते ऽर्थे धर्ममर्थः प्रसूयते ।
प्रसौति विजयं धर्मः स च प्रसवति श्रियम् ॥ २६ ॥
वृणक्ति वृजिनैः सङ्गं वृङ्क्ते च वृषलैः सह ।
वर्जत्यनार्जवोपेतैर्यो वर्जयति दुर्जनैः ॥ २७ ॥
संपृङ्क्ते नाभिशस्तैर्यः संपृणक्ति न पापिभिः ।
संपर्चयति न क्षुद्रैः संपर्चति न वञ्चकैः ॥ २८ ॥
तपत्यादित्यवद्धाम्ना तप्यते यः परं तपः ।
तपते रिपुराष्ट्रं च तापयत्यहितं सताम् ॥ २९ ॥

---

२३) cfr. *α* 50. L T F सर्व्वदोर्व्यां st. स° — च । L विद्विषां, B यत्त्विषः, A Bh*β* G P सर्वज्ञः, C सवज्ञः st. विद्विषः ॥ — २४) = *α* 48. C A Bh*β* G P om. भूरि । L F दारिद्रम° । G P दारिद्र्याण्यर्थि° । C A Bh*β* G P °र्थिनामपि । C A Bh*β* G P सत्की° । C A Bh*β* G P om. च ॥ — २५) = *α* 49. L T F तेषां st. तेषु । C A Bh*β* G P स st. च ॥ — २६) cfr. *α* 45. — २७) = *α* 52. t lässt diese u. d. folg. Str. aus, zählt aber richtig weiter. P वृजिनैर्यश्च वृक्ते । C A Bh*β* वृंक्ते, v वृङ्क्ते, seine Erkl. passt aber nur auf वृक्ते । C A Bh*β* G विकलैः सह ॥ — २८) cfr. *α* 53. t s. vor Str. F T L न सं° st. संपर्चति न ॥ — २९) cfr. *α* 36. Bh*β* तपते st. तप्यते । F तप्यते st. तपते । C A Bh*β* G P

योगां शुन्धति सत्येन शुन्धते तपसा तनुम् ।
धियं शुन्धयति ज्ञानाद्ध्यानाच्छुध्यति यन्मनः ॥ ३० ॥
साहयत्याहवे क्षोभं सहति द्रविणव्ययम् ।
अन्यायं सहते नासौ सह्यति क्षितिरक्षणे ॥ ३१ ॥
यश्च मीमांसते धर्मं मानयत्यखिलान्द्विजान् ।
मानति स्वजनं सर्वं शचौ मानयते परम् ॥ ३२ ॥
घिणणते न परद्रव्यं गृह्णाति विदुषां गुणान् ।
गर्हते हृदयं स्त्रीणां द्विषां गृहयते शिरः ॥ ३३ ॥
नित्यं महति माहेयीं भक्त्या महयति द्विजान् ।
लोके महीयते यस्य कीर्तिर्लक्ष्मीश्च मंहते ॥ ३४ ॥

यस् st. च । C A G °हितां दिशं, Bhβ °हितां दिशां, P °हितं सदा, B °ि
गृणाम् ॥

३०) cfr. α 35. A Bhβ योगं । B शुध्यति, ध्य über getilgtem ॰
C भुधा ‿ ‿, A शुधति, L F शुद्धति st. शुन्धति । P सत्वेन । B शुध्यं
ध्य über einer Tilgung, A शुधते, L F शुद्धते st. शुन्धते । A G P स्वभा
st. तपसा । A G B P v शुन्धयते, Bhβ C शुधयते, L F शुद्धयति । B ज्ञाना॰
C A Bhβ G P stellen ज्ञानात् und ध्यानात् um । Bhβ °नाच्छुध्यति । F जन्मन
L जन्मनः । Komm.: t vl शुद्ध शुद्धौ भ्वादिः शुद्ध शौचे कर्म्मणि आधृषादि
स्वरितेश्च [t स्वरिते च, vl सुचरिते च] शुध [vl शुद्ध] शौचे दिवादिः
— ३१) cfr. α 111. C A Bhβ G °हवक्षोभं । B सहते st. सहति ॥ — ३२) cfr. α 11
B यश्च getilgt, dafür यः स । L T F चार्थिनो st. अखिलान् । L T F शस्ते
st. शचौ ॥ — ३३) cfr. α 47. B L F घिन्नते, T घृणणते, C? G P v गृह्णीते
Bhβ गृणहीते, A गृहीते st. घिणणते, vl घृणि ग्रहणे, t घिणि घुणि घृणि
ग्रहणे । B पर verbessert aus परं । B द्विषतां, द्वि am Rande für eine Tilgung
st. विदुषां । t schweigt über die 3. Verbalform । A G P रिपोर्, C Bh
रियोर् st. द्विषां । C A Bhβ G P B गर्हयते, B गर्ह am Rande nachgefügt
v गर्हत इति गर्ह निंदायां भ्वादिः अस्यैव गर्हयत इति चुरादिः, L F गृह्णयते
oder °ह्र° st. गृहयते ॥ — ३४) cfr. α 51. v मंहयतीति मंह पूजायां चुरादिरदंतः
A कीर्त्तिर्यस्य st. यस्य कीर्तिर् ॥

धरते यो धुरं धर्म्यां धैर्यं धारयति ध्रुवम् ।
ध्रियते यत्र धीः सम्यग्धियति श्रीश्च शाश्वती ॥ ३५ ॥
इच्छति ब्राह्मणैः सङ्गमन्विष्यति सतां गतिम् ।
इष्णाति धर्मकार्येषु यः सदोन्नतिमीषते ॥ ३६ ॥
धर्मे व्याप्रियते नित्यं पिपर्ति पृथिवीं च यः ।
पारयत्यर्थिनामाशां पारयत्यखिलं व्रतम् ॥ ३७ ॥
चुट्यन्ति सर्वसंदेहास्त्रुटन्ति ग्रन्थयो हृदि ।
यस्यात्मज्ञानिनो दुःखं तुडत्येनश्च तूडति ॥ ३८ ॥
मिनोति मार्गणान्युद्धे मीनाति द्विषतां बलम् ।
यो मायां मीयते मान्यो धर्मेण मयते धनम् ॥ ३९ ॥

---

